॥ ओ३म् ॥
आपत्सु मग्नस्स्मरणन्त्वदीयम्
करोमि दुर्गे करुणार्णवेशि।
नैतच्छठत्वम्मम भावयेथा:
क्षुधातृषार्ता जननीं स्मरन्ति॥10॥
(देव्यपराधक्षमापनस्तोत्रम्)

बालादपि गृहीतव्यं
युक्तमुक्तं मनीषिभिः।
रवेरविषये किं न प्रदीपस्य प्रकाशनम्॥
हितोपदेश २.७९

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
उद्धरेदात्मनात्मानं
नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुः
आत्मैव रिपुरात्मनः ॥
(श्रीमद्भगवद्गीता - 6/5)

सत्यस्य वचनं श्रेयः
सत्यादपि हितं भवेत्।
यद्भूतहितमत्यन्तमेतत्सत्यं
मतं मम॥
महाभारत शान्ति पर्व-12.316.13

卐 वर्षम्-१४ 卐 अंकः-०६ (३१८) नवदेहली 卐 १६ सितम्बरमासः २०२४तः ३० सितम्बरमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८

## आस्ट्रेलियायाः ब्रिस्बेनविश्वसम्मेलने संस्कृतमहत्त्वस्य उद्घोषो जातः

दिल्ली /ब्रिस्बेन ( अजयकुमारमिश्रा )

सूचनीयं च यद् ब्रिस्बेन द्वि-दिवसीयसंस्कृत सम्मेलनस्य समापन कार्यक्रमे रेगन प्रांतस्य मेयर,जोन,मुख्यातिथि रूपेण उपस्थिताः। तेनोक्तं यत् मम पत्न्याः जन्मस्थानं चेक गणराज्यं, यद्यपि




ऑस्ट्रेलिया निवासी । परंतु अस्माकं बालाः तत्रत्यसंस्कृत्या पूर्णतः अपरिचिताः। तेनोक्तं यत् सामाजिक गतिशीलता दीर्घ कालिक स्थान परिवर्तनस्य कारणेन संस्कृतिः क्वचित्-क्वचित् विलुप्ता जाता। क्वीन्सलैंड विश्वविद्यालयस्य प्रो एडम्स पौलः स्व विचारान् व्यक्तीकुर्वता कथितं तदीयशोधकार्यं महाभारते वर्तते। यस्य कृते भारतस्य पुणेनगरं गत्वा संस्कृतस्य अध्ययनं कृतम् आसीत्। तत्र अष्टाध्यायी, शेषभागःद्वितीयेपुटे




## संस्कृतभारत्याः अखिलभारतीयगोष्ठी आयोजिता

-धीरज मैठाणी

हरिद्वारम्। संस्कृतभारत्याः अखिलभारतीयगोष्ठी 15 सितम्बर 2024 दिनाङ्के श्रीव्यासमन्दिरे, हरिपुरकलाहरिद्वारे आरब्धा। यस्य उद्घाटनं मुख्यमंत्रीपुष्करसिंहधामीवर्येण दीपप्रज्ज्वालनेन कृतं। अवसरेस्मिन् स्वामीचिदानंदसरस्वतीमहाराजः अध्यक्षः, परमार्थनिकेतन-आश्रम-ऋषिकेशतः, कार्यक्रमाध्यक्षः प्रो. गोपबंधुमिश्रः (अखिलभारतीयाध्यक्षः संस्कृतभारतीतः), विशिष्टातिथिः श्रीमती जानकी त्रिपाठी (प्रान्ताध्यक्षा संस्कृतभारती-उत्तराञ्चलतः) दिनेशकामतः संस्कृतभारती-अखिलभारतीयसंगठनमंत्री, प्रो. वाचस्पतिः मिश्रः, डॉ. अंकितवर्मा आदयः उपस्थिताः आसन्। डॉ. वेदव्रतः सर्वेषां अतिथिनां परिचयं कृतवान्। डॉ.



अरुणमिश्रा वैदिकमंगमलमाचरितवान्। रुद्राक्षमालया, गंगाजलेन, अंगवस्त्रेण च सर्वेषाम् अतिथीनां अञ्जनीमूर्तैः स्वागतं जातं।

अखिलभारतीयसङ्गठनमन्त्री संस्कृतभारती श्रीदिनेशकामतः उक्तवान् यत् संस्कृतभारतीसंस्था २६ देशेषु संस्कृतकार्यं कुर्वती अस्ति। सरलसंस्कृतसम्भाषणेन सह संस्कृतभारती सरलसंस्कृतं, पुस्तकलेखनम्, निःशुल्कस्वाध्ययनकेन्द्रं,दशदिवसीयसम्भाषणशिबिरं,बालकेन्द्रं,गीताशिक्षणकेन्द्रं, संस्कृतसप्ताहं, खण्डस्तरे, जिल्लास्तरे, राज्यस्तरे च आयोजयति। लोकसभायां राज्यसभायां च नवनिर्वाचितैः सांसदैः संस्कृतेन शपथग्रहणं कृत्वा सर्वेभ्यः धन्यवादः प्रदत्तः। उत्तराखण्डराज्यस्य द्वितीया राजभाषा संस्कृतम् अस्ति तथा च उत्तराखण्डे विद्यालयशिक्षणे संस्कृतं अनिवार्यं भवेत्। नूतनशिक्षानीत्याः अन्तर्गतं संस्कृतभाषा तृतीयकक्षातः

शेषभागःतृतीयेपुटे

## कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये त्रिदिवसीयराष्ट्रियबौद्धसम्मेलनं सम्पन्नम्

रामटेकः (डॉ.रेणुकाबोकारे) कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेकः इंडियनसोसाइटी फॉरबुद्धिस्टस्टडीज, जम्मू इत्यनयोः सहयोगेन रामटेके त्रिदिवसीयं राष्ट्रियबौद्धसम्मेलनं संपन्नम्। समारोहस्य अध्यक्षतां माननीय कुलगुरु प्रो. हरेरामत्रिपाठी अकरोत् प्रमुखातिथिरूपेण कालिदाससंस्कृत विश्वविद्यालयस्य



संस्थापक कुलपति डॉ. पंकजचांदे, 24तम वार्षिकबौद्धपरिषदः अध्यक्षः प्रो. मुरलीमनोहरपाठकः, मा. लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नईदिल्ली उपस्थिताः आसन्। विशिष्टातिथि रूपेण प्रो. जी एस आर कृष्णमूर्तिः, कुलपतिः, राष्ट्रिय संस्कृत विश्वविद्यालयः, तिरूपतिः, डॉ. रमेश प्रसादः, संपूर्णानंदसंस्कृत विश्वविद्यालयः, वाराणसी, प्रो रामनारायणद्विवेदी, बनारसहिंदूविश्वविद्यालयः, वाराणसी डॉ. पुरणचंद्र मेश्रामः, पूर्व कुलसचिवः, नागपुरविश्वविद्यालयश्च उपस्थिताः आसन् । विशेषातिथि रूपेण इंडियन

शेषभागःसप्तमपुटे

## अटलबिहारीवाजपेयीविश्वविद्यालये संस्कृतअध्ययनकेन्द्रे संस्कृतदिवसमारोहस्य आयोजनम्

-डॉ नेहामिश्रा/विलासपुर-छत्तीसगढ़।

अटलबिहारीवाजपेयीविश्वविद्यालये 4/9/2024 दिनाङ्के संस्कृतदिवसहमारोहः अभवत्। कार्यक्रमेऽस्मिन् मुख्यवक्तारूपेण विराजितवन्तः डॉ राजकुमारतिवारी महोदयः एते महोदयाः उक्तवन्तः यत् संस्कृते एव अस्माकं भारतीयसंस्कृतिः अस्ति अतः संस्कृतिरक्षणार्थं संस्कृतम्





आवश्यकम्। सभाध्यक्षारूपेण विराजितवन्त अस्माकं कुलगुरवः डॉ अरुणदिवाकरनाथवाजपेई महोदयः। एतेषां महोदयानां संस्कृतविषये विशिष्टं श्रद्धा वर्तते। विशिष्टवक्तारूपेण विराजितवन्तः डॉ शरदमिश्रमहोदयः। एते महोदयाः संस्कृतविषये विशिष्टं कार्यं कृतवन्तः। स्वागतभाषणं कृतवती संस्कृतअध्ययनकेन्द्रस्य केन्द्राधिकारी डॉ पूजा पाण्डेय महोदयाः। केन्द्रशिक्षिका डॉ नेहामिश्रा मञ्चसञ्चालनं कृतवती। सा उक्तवती यत् भारतसर्वकारः संस्कृतस्य रक्षणार्थं विशेष प्रयत्नशीलः अस्ति अतः यदि वयम् अपि प्रयत्नं कुर्मः तर्हि संस्कृतभाषायाः रक्षणं अवश्यमेव भविष्यति। धन्यवादज्ञापनं कृतवान् छात्रकल्याणअधिष्ठाता डॉ एच एस होता महोदयः। कार्यक्रमेऽस्मिन् विश्वविद्यालयस्य सर्वे शिक्षकाः शिक्षिकाः छात्राः च उपस्थिताः आसन्।

## शिक्षकदिनावसरे महाविद्यालयप्राचार्याणां नेतृत्वे महाविद्यालयस्य सभागारे भव्यकार्यक्रमः समायोजितः

महाविद्यालयस्य वाग्वर्धिनीपरिषदः सदस्याः सम्भूय अमुं कार्यक्रमं समचालयन्। कार्यक्रमस्य आरम्भे मुख्यातिथयः आचार्याः ओमदत्तसरोचवर्याः महाविद्यालयस्य प्राचार्याः अन्ये आचार्याश्च




दीपप्रज्वालनपूर्वकं कार्यक्रमस्य समुद्घाटनम् अकार्षुः। तदनु छात्राः भाषण-कविता-गीत-नृत्यादिविविध कार्यक्रमान् प्रदर्शयित्वा गुरुमहिमानम् अवर्णयन्। सभासंचालकौ विनयकुमारी-अक्षितौ प्रत्येकं शिक्षकम् अपि स्वप्रतिभां प्रदर्शयितुं छात्रपक्षतः निवेदितवन्तौ। समेपि शिक्षकाः भजन-सांस्कृतिकनृत्य-कविता-संस्मरण-गीतादिद्वारा स्वकलां प्रादर्शयन्। अन्ते मुख्यातिथीनाम् उद्बोधनं शिक्षकाणां सम्मानकार्यक्रमश्च प्रवृत्तः। ज्योतिषविभागस्य आचार्यः डा. मुकेशकुमारः पद्यमयकार्तज्ञ्यं न्यवेदयत्। कार्यक्रमस्यास्य संयोजनं साहित्यविभागस्य वरिष्ठाः आचार्याः डा. रविदत्तशर्माणः अकुर्वन्।

## उत्तरप्रदेश-संस्कृतसंस्थानस्य ऑनलाइन-संस्कृतशिक्षण-कक्षाणाम् उद्घाटनम्

– स्तुतिगोस्वामी, लखनऊ

उत्तरप्रदेश संस्कृतसंस्थानेन संचालितानाम् विंशतिदिवसीयानां ऑनलाइन संस्कृतशिक्षणकक्षाणां सितम्बरमासस्य चक्रस्य आरम्भः अभवत्। यासु सहस्राधिकाः जनाः आगत्य आभासिकमाध्यमेन सरलरीत्या संस्कृतस्य रसास्वादनं कुर्वन्ति। विगत चतुर्भ्यः वर्षेभ्यः एषा योजना निरन्तरम् अबाध्य प्रचलति। अस्मिन् एव क्रमे अस्य सितम्बरमासस्य कक्षारम्भः पञ्चदिनाकतः अभवत्। प्रथमदिवसे सर्वे सरलरीत्या संस्कृतेन परिचयं कथं दातव्यम् एतत् पठितवन्तः। एषां कक्षाणां संचालनं नियन्त्रणञ्च उत्तरप्रदेश संस्कृतसंस्थानस्य वरिष्ठाधिकारिभिः भवति। संस्थानस्य कार्यकारी अध्यक्षस्य आई.ए.एस. जितेंद्र कुमारस्य प्रेरणया, निदेशकस्य श्री विनयश्रीवास्तवस्य नेत्रत्वे, प्रशासनिकाधिकारी श्री दिनेशमिश्रस्य, श्री जगदानन्दस्य, योजनाप्रमुखस्य श्री भगवानसिंहचौहानस्य, प्रशिक्षणप्रमुखस्य श्री सुधीष्ठमिश्रस्य कुशलनिर्देशने शान्तनुमिश्रः इत्यादीनां कार्यालयीयजनानां सहयोगेन, समन्वयकगणस्य धीरजमैठाणी, दिव्यरंजनः राधाशर्मा एतेषां कुशलप्रबन्धने च एताः ऑनलाइन संस्कृतशिक्षणकक्षाः संचलन्ति। कोऽपि जनः संस्थानस्य वेबसाइट https://sanskritsambhashan.com/ उपरि गत्वा निश्शुल्कं पंजीकरणं कृत्वा इच्छानुसारेण समयं मासञ्च चीत्वा पठितुं शक्नोति।

## केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपाल-परिसरे शोधप्रस्तावलेखन-कार्यशाला अनुष्ठिता

– प्रवेशकुमारशुक्लः, भोपाल। केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपाल-परिसरे शिक्षाचार्यच्छाणां कृते द्विदिवसीय शोधप्रस्तावलेखन-कार्यशालायाः आयोजनमभूत्। आदौ सुरभारतीसमुपासनेन इयं कार्यशाला प्रारम्भा। विषयविशेषज्ञत्वेन डा० हरिसिंहगौरविश्वविद्यालयतः शिक्षाशास्त्रविशारदाः प्रो० संजयशर्ममहाभागाः समागताः, ते शोधच्छात्राणां समस्यायाः निवारणं कथं स्यात् एवञ्च तथ्याधारितसंस्कृतशोधप्रविधीनां



सुष्ठुः प्रयोगः कथं करणीयमित्यादि विषये बोधिताः। समन्वयकाः शिक्षाशास्त्रविशारदाः प्रो० सोमनाथसाहुमहोदयाः आगतानामतिथीनां वाचिकस्वागतं कृतवन्तः।

अध्यक्षपदमलंकुर्वन्तः सुकवयः परिसरनिदेशकाः प्रो० रमाकान्तपाण्डेयवर्याः निगदितं यत् 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तद् क्वचिद् अर्थात् शास्त्रे सर्वं विद्यते अतः तथ्याधारितशोधकार्यं करणीयम्।

सभायाः सञ्चालनं डा० कृष्णकान्ततिवारिवर्याः कृतवन्तः। डा० कालिकाप्रसादशुक्लवर्याः,श्री अंकुरपाण्डेय, समस्तविभागीयाः आचार्याः एवञ्च शोधछात्राः समुपस्थिताः आसन्। शिक्षाशास्त्रविद्याशाखायाः वरिष्ठाचार्याः प्रो० अशोककुमारकछवाहमहाशयाः सर्वेषां समुपस्थितानामाचार्याणां धन्यवादज्ञापनं कृतवन्तः। अन्तिमे शान्तिमन्त्रेण कार्यशालायाः समुद्घाटनसत्रं सुसम्पन्नं जातम्।

प्रथमपुटस्य शेषभागः

## आस्ट्रेलियायाः ब्रिस्बेन विश्व....




सांख्य शास्त्रं धर्मशास्त्रं च अधीतम् आसीत्। स्वामि नारायण शोध संस्थानस्य अध्यक्षः, स्वामी भद्रेश दासः संस्कृत विदुषां भव्योपस्थितौ केन्द्रीय संस्कृत विश्वविद्यालयः ,दिल्ली कुलपतिः प्रो श्रीनिवास वरखेडी सोमनाथ संस्कृत विश्वविद्यालयस्य कुलपतिः प्रो सुकान्त कुमार सेनापतिः सम्मानितः। दिव्य समापन समारोहः क्वीन्सलैंड प्रांते निवसतां दक्षिण-उत्तर भारतं, नेपाल- ऑस्ट्रेलिया इत्येषां स्थानीय लोकानां सहभागितया संस्कृत भाषां प्रति वैदेशिक भूमिः सुशोभिता जाता। प्रो वरखेडी केन्द्रीय संस्कृत विश्वविद्यालयस्य विभिन्न आकादमिक गतिविधीनां विषये वीडियो माध्यमेन सूचना सम्प्रेषणं कृतवान्। कुलपतिः प्रो सेनापतिः उक्तवान् यत् तदीय विश्वविद्यालयस्य पाठ्यक्रमे पुरुषोत्तम दर्शने अध्ययनाय शोध कार्याय च संस्कृते एव अवसरं प्रदत्तवान्। स्वीये अध्यक्षीये उद्बोधने संत स्वामी भद्रेश दासः कथितवान् यत् अस्मभ्यं प्रमुख स्वामिमहाराजस्य लिखित आदेशः आसीत् यत् एतादृशः सार्थक प्रयासः भवेत् येन ऑस्ट्रेलियायां जन्मप्राप्तः बालः संस्कृतेन संभाषणं कुर्यात। अनेन सहैव शांति मंत्रेण सत्रसम्पूर्तिः अभवत्।

# एकादशी श्रीमद्रामायण-व्याख्यानगोष्ठी सम्पन्ना

**-डॉ चंद्रकांत दत्त शुक्ल**

(प्रचनात् कविपुङ्गवः तपश्चर्याद् वाल्मीकिश्च जायते' महामहोपाध्यायः आचार्यो मिथिलाप्रसादत्रिपाठी)

हिन्दीदिवसमभिलक्ष्य भाद्रपदशुक्लैकादश्यां चातुर्वेदसंस्कृतप्रचारसंस्थानेन जगन्नाथविश्वविद्यालयः जयपुर-राजस्थानम् श्री एकरसानन्द आदर्श संस्कृत महाविद्यालयः, मैनपुरी-उ.प्र. इत्येतेषां संयुक्ततत्त्वावधाने श्रीमद्रामायण-व्याख्यानगोष्ठी सम्पन्ना।

विशिष्टवक्ता जगद्गुरुरामानन्दाचार्य संस्कृतविश्वविद्यालयः जयपुरस्य दर्शनविभागाध्यक्षाः शास्त्री कोसलेन्द्रदासवर्येण 'श्रीमद्रामायणस्य लोकभाषासु प्रभावः' विषयमधिकृत्य व्याख्यानं प्रदत्तम्। एतस्मिन् तैरुक्तं यत् हनुमान् जी महाराज एव प्रप्रथमं भाषाया वैविध्यं प्रोवाच। 'यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् । रावणं मन्यमाना मां सीता भीता भविष्यति।' अतः प्रचलितासु भाषासु मानुषीं, तत्रापि संस्कृतां भाषां वदिष्यामीति निर्णीतवान्। 'वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्।' इत्थं रामयणस्य परम्पराभाषासाहित्यादिक्षेत्रेषु अद्वितीयं योगदानमस्ति। सभ्यतायाः, कलायाः, संस्कृतेः, संस्कारस्य च समृद्धिरपि कृता वर्तते।

मुख्यातिथिः जगन्नाथविश्वविद्यालयस्य उपकुलपतिः प्रख्यातः अभियान्त्रकीविद् प्रो.ओमप्रकाशशर्ममहोदयः सम्बोधयत् यदद्यत्वे समाजे महती समस्या अस्ति अवसादस्य (डिप्रेशन) यस्माद् मुक्तये रामायणं महत्वपूर्णो ग्रन्थो वर्तते। अपि च रामायणं पारस्परिक-समरसताया मन्त्रं शिक्षयति। अस्याध्ययनं सर्वैः करणीयम्। एतादृशम् आयोजनं छात्राणां कृते विशेषेण पौनः पुन्येन च भवेत्।

सभाध्यक्षः महर्षिपाणिनि वैदिक एवं संस्कृतविश्वविद्यालयस्य पूर्वकुलपतिः महामहोपाध्यायः आचार्य मिथिलाप्रसादः त्रिपाठीवर्यो रामायणस्य विभिन्नप्रसङ्गोपस्थापनेन सूत्ररूपेण च रामकथाम् अश्रावयत्। महोदयः प्रोवाच महर्षिः प्रवचनात् कविपुङ्गवः, तपसो वाल्मीकिश्च बभूव। यो हि तपो युक्तं स्वाध्यायमाचरति सः कविपुङ्गवो भवति। महर्षिणा रामायणेन जन-जनहृदयम् एकसूत्रेण ग्रथितम्। रामायणं जनानां, समाजस्य, राष्ट्रस्य रक्षायै तपश्चर्यां शिक्षयति। स्वाध्यायं प्रति प्रबोधयति।

आद्ये युवकविः श्री पङ्कजझा मङ्गलाचरणं कृतवान् ततो डॉ. रामबदनपाण्डेयवर्यः स्वागतव्याहृतिम्, धन्यवादव्याहृतिञ्च समन्वयकः श्री मुकेशकुमारशर्मा।

गोष्ठ्याः सञ्चालनं संयुक्तसंयोजिका काव्याशी मिश्रा आचार्या हिन्दी, संयोजकः डॉ. चन्द्रकान्तदत्तशुक्लः, इत्युभाभ्यां कृतम्।

अवसरेस्मिन् राजस्थानमुख्यमन्त्रिणः परामर्शकः श्री हिरेन जोशी, प्रो.मञ्जूलता शर्मा, प्रो.शोभा मिश्रा, प्रो.प्रीति वाधवानी, प्रो.हेमन्त शर्मा, डॉ. उपेन्द्रनाथपाण्डेयः, डॉ. अरविन्द तिवारी, डॉ. प्रदीपदीक्षितः, डॉ. आभा द्विवेदी, डॉ. तेजप्रकाशः, श्रीरमेश चन्द्रा, श्री लवशुक्लः, डॉ. धनञ्जयमणि त्रिपाठी, डॉ. आरुणेयमिश्रः, डॉ. शारदा पाठक, डॉ. सुधीरकुमारः, डॉ. यीशनारायणः, डॉ. मूलचन्द्रशुक्लः, डा. हेमचन्द्रः, डॉ. पवनकुमारपाण्डेयः, पुष्पराजः, मान्धाता प्रजापति, मधुरिमा चौहान, रञ्जीतवर्मा, सरोजकुमारी, कुलदीपकुमारः इत्यादयः शताधिकाः शोधार्थिनः, छात्राः, जिज्ञासवः, विद्वासः सम्मिलिताः आसन्।

प्रथमपुटस्य शेषभागः **संस्कृतभारत्याः अखिलभारतीयगोष्ठी....**

१२ कक्षापर्यन्तं भारतीयज्ञानपरम्परायाः अन्तर्गतं विषयरूपेण अनिवार्यतया पाठनीया। स आह यत् संस्कृतं न जानाति सः भारतं कथं ज्ञास्यति। सः सर्वान् संस्कृतभाषायां वक्तुं कार्यं कर्तुं च प्रेरितवान्।

कार्यक्रमे पावनसानिध्ये स्वामीचिदानन्दसरस्वती उक्तवान् यत् संस्कृतभारती अद्य देशस्य अन्तः विदेशपर्यन्तं संस्कृतसम्भाषणस्य गौरवं प्राप्तवती अस्ति। आगमिष्यमाणः युगः संस्कृतस्य भविष्यति इति सः



अवदत्।

मुख्यमन्त्री श्रीपुष्करसिंहधामी, अखिलभारतीयगोष्ठीम् सम्बोधयन् उत्तराखण्डपक्षतः गोष्ठ्याः सम्पूर्णभारतीयप्रतिनिधिनां स्वागतं कृतवान्। सः अवदत् यत् अद्यत्वेऽपि संस्कृतं केवलं व्यञ्जनं न अपितु संस्कृतं सर्वेषां मानवजातेः विकासस्य भाषा अस्ति, संस्कृतं सर्वभाषाणां जननी अस्ति। प्राचीनकालात् एव अद्यपर्यन्तं संस्कृतम् अस्माकं ज्ञानभाषा अस्ति। वैश्विकसन्दर्भस्य प्रमाणरूपेण सः अवदत् यत् अन्ताष्ट्रियस्तरस्य ग्रहनक्षत्राणां कालगणनायाः औषधानां च कृते संस्कृतग्रन्थाः प्रमाणरूपेण उद्धृताः भवन्ति। संस्कृतभाषायाः अक्षरोच्चारणस्य वैज्ञानिकतां व्याख्याय सः अवदत् यत् संस्कृतस्य शब्दोच्चारणे कोऽपि अक्षरः नष्टः न भवति, आङ्ग्लभाषायां तु नष्टः भवति। अपि च उक्तं यत् संस्कृतं सम्पूर्णतया शुद्धा वैज्ञानिकभाषा अस्ति।

संस्कृतव्याकरणस्य उदाहरणं दत्त्वा सः अवदत् यत् संस्कृतभाषायां वाक्ये शब्दान् अग्रे-पश्चात् स्थापनेन अपि तस्य अर्थे कोऽपि प्रभावः न भवति, अन्यभाषासु तु अर्थविविधता भवति। सः अवदत् यत् संस्कृते एकस्मिन् अक्षरे श्लोकं रचयितुं सामर्थ्यं वर्तते। विश्वे अन्यस्याः कस्यापि भाषायाः एतादृशी शक्तिः नास्ति । अस्मिन् समये मुख्यमन्त्री ग्रीष्मकालीनराजधानी गैरसैणसभायां आयोजितस्य संस्कृतसम्भाषणस्य अपि उल्लेखं कृतवान्। सः अवदत् यत् वयं राज्ये संस्कृतसंर्वधनस्य कृते प्रयत्नाः जायन्ते। संस्कृतभारती-उत्तराञ्चालस्य न्यासी प्रो. प्रेमचन्दशास्त्री सर्वातिथिभ्यः धन्यवादं दत्तवान्।

डॉ. प्रकाशपन्तः उत्तराखण्डस्य स्थानस्य परिचयं कुर्वन् अवदत् यत् उत्तराखण्डे १२ शताब्द्याः संस्कृतलेखनपरम्परायाः प्रमाणानि सन्ति। राजाललितसुरदेवस्य लेखनानि वर्णयन् सः अवदत् यत् तत्कालीनस्य पर्वतराज्यस्य राजभाषा अपि संस्कृतम् एव आसीत् । अद्यत्वेऽपि उत्तराखण्डे भन्तोला (बागेश्वरं) किमोठा (चमोली) इति संस्कृतग्रामद्वयं वर्तते ।

डॉ. भारतीकन्नौजिया शान्तिपाठेन सत्रं समाप्तं कृतवती। प्रान्तमन्त्री गिरीशतिवारी मंचसंचालनं कृतवान्। अस्मिन् अवसरे उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो.दिनेशचन्द्रशास्त्री, संस्कृतशिक्षासचिवः श्री दीपककुमारः, संस्कृतशिक्षानिदेशकः डॉ. आनन्दभारद्वाजः, प्रो.लक्ष्मी निवासपाण्डेयः, दत्तात्रेयवर्यः, डॉ. संजीवः, डॉ. सचिनकठाले, डॉ. देवेन्द्रपण्ड्या, च भारतस्य सर्वेभ्यः राज्येभ्यः संस्कृतभारत्याः प्रतिनिधयः उपस्थिताः आसन्।

# दयालसिंह-महाविद्यालयेन करनालस्थेन सूक्तिलेखननिबन्ध-लेखनयोः प्रतियोगितायाः सफलं आयोजनम्

(वार्ताहरः वत्सदेशराजशर्मा)

१४ सितम्बर ,२०२४ तमं दिवसं दयालसिंह-महाविद्यालयस्य करनालस्थस्य संस्कृतविभागेन संस्कृतसाहित्यपरिषदा च सूक्तिलेखननिबन्धलेखनयोः प्रतियोगितयोर्भव्यं आयोजनं कृतम्। सूक्तिलेखनप्रतियोगितायां ४१ छात्रा, निबन्धलेखनप्रतियोगितायां ३६ छात्राश्च भागं गृहीतवन्तः। तेषां सर्वेषां छात्राणां रचनात्मकता संस्कृतभाषाया ज्ञानं च प्रशंसनीयमासीत्।




कार्यक्रमस्य शोभां वर्धयन्ती माननीया महाविद्यालस्य प्राचार्या डॉ. आशिमा-गक्खड-महोदया छात्रेभ्यः शुभाशया दत्वा संस्कृतभाषाया महत्त्वं विस्तरेण प्रकाशयामास। डॉ. गक्खड-महोदयया छात्राः संस्कृतभाषायाम् उच्चशिक्षाया अवसराणि प्रकाशीकृतानि। तेन एषा प्राचीनभाषा अद्यतनपरिप्रेक्ष्ये अपि अतीव प्रासङ्गिका अस्तीत्यपि छात्राः प्रेरिताः।

स्वस्य भाषणस्य अन्ते प्राचार्या महोदया संस्कृतभाषाया वैज्ञानिकदार्शनिकमहत्त्वं पुनः प्रकाशयन्ती उवाच - एषा भाषा केवलं प्राचीनसंपदा नास्ति, किन्तु अद्यतनकाले अपि अति प्रासङ्गिकी अस्ति। सा छात्रान् प्रेरयामास यत् ते संस्कृतभाषायां व्यावसायिकसन्दर्भे अपि बहवोवसरा विद्यन्ते इति। संस्कृतस्य अध्ययनं केवलं शैक्षिकं कार्यं नास्ति, अपि तु एतद् व्यावसायिकमार्गोपि अस्ति इति।

कार्यक्रमस्य सफलं संचालनं संस्कृतविभागाध्यक्षेन श्रीमता दीपकशास्त्रिणा कृतम्। तेन कार्यक्रमस्य यथायथं आयोजनं सम्यक् च संचालनं कृतम्। कार्यक्रमे समापनसमये सर्वेभ्यः छात्रेभ्यस्तेषां सक्रियसहभागितायाः कृते सम्मानं प्रदत्तम्। एतदायोजनं न केवलं संस्कृतभाषाया छात्रेषु रुचिं वर्धयति, अपि तु संस्कृतं सशक्तं शैक्षिकव्यावसायिकं विकल्पं च भविष्याय दर्शयति।

प्रतियोगितायाः परिणामा एते अभवन् -

सूक्तिलेखनप्रतियोगिताः

प्रथमस्थानम् - दिशा

द्वितीयस्थानम् - नीरजः

तृतीयस्थानम् - जगप्रीतः

सान्त्वनापरितोषिकम् - डिम्पलः

निबन्धलेखनप्रतियोगिताः

प्रथमस्थानम् - साहिलः

द्वितीयस्थानम् - नीरजः

तृतीयस्थानम् - नेहा

सान्त्वनापरितोषिकम् - अनुजः

एतत्सम्पूर्णकार्यक्रमं संस्कृतभाषाया आधुनिकशिक्षापरिप्रेक्ष्ये नूतनशिखरं प्रापयत्। यद् एषा प्राचीनभाषा यावदधिकं रुचिसम्पन्ना भविष्यति तथा संस्कृतस्य समृद्धसंपदायाः संरक्षणे अपि महत्तमं योगदानं भविष्यति।

# युवसंस्कृतचलच्चित्रनिर्देशक-सम्मानेन डॉ.मानसरञ्जनसाहुः सम्मानितः

(वार्ताहरः वत्सदेशराजशर्मा)

युवसंस्कृतचलच्चित्रनिर्देशक-सम्मानेन संस्कृतशिक्षकसङ्घः,कलाहाण्डिशाखापक्षतः आयोजिते विश्वसंस्कृतदिवसपालनावसरे डॉ.मानसरञ्जनसाहुः महोदयः सम्मानितः अभवत्। संस्कृतक्षेत्रे एवं विशिष्टं



परिचयं लब्धवान् अस्ति डॉ.मानसरञ्जनसाहुः महोदयः। संस्कृतचलच्चित्राणां निर्माणं कृत्वा संस्कृतभाषायाः प्रचारं करोति डॉ.साहुः। संस्कृतप्रचारेण सह समाजसेवा भवति अनेन कार्येण इति डॉ.मानस वदति। शीघ्रं ष्नमस्तस्यैष तथा एकं प्रेतचलच्चित्रं ष्पुं,न स्त्रीष इति चलच्चित्रद्वयं लोकार्पितं भविष्यति इति महोदयः सूचितवान् अस्ति।

# सम्पादकीयम्

## ओमिति पदस्य माहात्मयम्

हिन्दु संस्कृत्यां ओमिति पदस्य अत्यधिकं सम्मानितं स्थानं वर्तते । वैदिकपाठः सह नैकासु स्तुतिषु भजनेषु अर्चनासु विशेष स्थानं वर्तते। हिन्दुधर्मादतिरिक्तं अन्येषु धर्मेषु अपि ओमिति शब्दः प्रचलितः । ईसाईधर्म आमैन्, इस्लामे आमीन् इति रूपे ज्ञायते । वस्तुतः ओमिति पदमन्येषु देशेषु संस्कृतिषु च कदा प्राप्तमित्यस्य किमपि स्पष्टोल्लेखः नैव प्राप्यते । बौद्धधर्मस्य तु वैदिकधर्मेण निकटता प्रायः दृश्यते एव अतः बौद्धधर्म ओमितिपदस्य यथावत् प्रयोगः प्राप्यते। वैदिकसंस्कृतौ यत्र परमात्मनः नैकानि नामानि सन्ति तत्रैव ओमिति पदस्य स्थानं सर्वोपरि विद्यते । प्रायः सर्वेषु उपनिषत्सु ओमिति पदस्य माहात्मयं वर्णितमिति । कठोपनिषदि यथा सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्य चरन्ति, तत्ते पदं संग्रहेण ब्रवीमि ओमित्येतत् ।।

अपि च-

एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।।

ओमिति पदस्य व्यत्पत्तिः अव धातोः मन् प्रत्यये कृते प्रतिपदिता। अव धातोः अर्थः रक्षण-गति-कान्ति-प्रति-अवगम-प्रवेश श्रवण स्वामी अर्थयाचन-त्रिया-इच्छा- दीप्ति- अवाप्ति- आलिङ्गन-हिंसा-दन-भाग-वृद्धिषु पठितः पणिनिना। उपरोक्तप्रकारेसु विशत्यीः अपि च स्वामी-अर्थयोः, दान आदानयोः संयोगेन द्वाविंशत्यर्धा अव-धातोः क्रियन्ते। ओमितिपदे परमात्मनः सर्वाणि नामानि समाहितानि भवन्ति। अपि च कथित योगदर्शनं- तस्य वाचकः प्रणवः। कठोनिजदि च एतद्धेवाक्षर ब्रह्म इति।

अस्य पदस्य विविधेभ्यः अर्थभ्यः ज्ञायते यत् ओमिति पदे अर्थानां वारिधिः समाहितः। येन प्रकारेण ईश्वरः अनन्तगुणानां कर्मणं स्वभानानां चाधिशता वर्तते तथैव अस्मिन् पदे तस्य सर्वान् अर्थान प्रकटीकरणस्य सामध्यं वर्तते। अस्य सरलतायामेव परमात्मनः गुणः सन्निहितः।

भवदीया
सम्पादिका

## ।। वेद वाणी ।।

नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः ।
कस्य स्वित्पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा।।

' I do not understand the warp and woof- the subtle and gross elements of- of fabric of this creation. Nor do I know of that which those who are assiduous in united exertion weave.No man, howsoever taught by a" father born after the creation, can rightly know anything previous to his birth, either in this world or the next.'"

The Rig Veda 6.9.1"

'त्वं नः पाह्यंहसो जातवेदो अघायतः ।
रक्षा णो ब्रह्मणस्कवे।।'

'Jatavedas, from whom we gain knowledge, wisdom and understanding, may preserve us from sin; the enunciator and master of prayers, may protect us from the malevolent.'

The Rig Veda 6.16.30

'विश्वदानीं सुमनसः सयाम पश्येम नु सूर्यमुच्चरन्तम।
तथा करद वसुपतिर्वसूनां देवानोहानो.अवसागमिष्ठः ।।
इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना ।
पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव।।
विश्वे देवास आ गत शर्णुता म इमं हवम।
एदं बर्हिर्नि षीदत।।'

'May we, at all seasons, be possessed of good minds. Let us always reflect on the most noble thoughts. May we forever behold the rising Sun in the sky. The God of Wealth, who favours the wise may come to us and grant us His protection."May Lord Indra come to us most promptly, with all His instruments of protection. May the river Sarawathi, in full flow, with waters drawn from Her sources, protect us. May Parjanya, the God of clouds, grant us happiness by helping medicinal herbs grow well. May venerable Agni, God of Fire, in a state of ease and quiet joy, call us like a father."O!Gods!Hear our invocation. Come and sit at the place of sacred fire.'

The Rig Veda 6.52.5/6/7

**संकलन : एस.वासुदेव रावः**

# भगवती गङ्गा-'दिव्यमुक्तेः पवित्रतायाः च अनन्तः प्रवाहः'

**-बलदेवानन्द सागरः**

भगवतः विष्णोः ज्ञानरूपा भावरूपा क्रियारूपा च तिलः शक्तयः वर्तनी, ता भगवती लक्ष्मी, भगवती सरस्वती, भगवती गङ्गा चेति विद्वद्भिः निगद्यते।

एकदा भगवान् विष्णुः भगवतों गङ्गाम् अकधयत् 'त्वं पृथिव्यां पवित्र नदीत्वेन भवितासि या हि बसुधा वासिनाम् अखिलानां प्राणिनां पापानि अपाकरिष्यति। सूर्य-वन्शावतन्सः भगीरथः नाम राजा त्वां पृथ्वों सप्रेष्यति। अनन्तरं त्वं भगवतः शिवस्य पनीरूपेण कैलास पर्वतं प्रतिक्षिता भवितासि।'

सूर्यबन्यो सगरः नाम नृपतिः अभवत् स च अश्वमेध-यागस्य अनुष्ठानम् अकरोत् यज्ञ-सम्पूर्ति हेतोः सगरस्य षष्टि- सहस्रं पुत्राः यागस्य अश्वेन सह पूर्णस्य विश्वस्य पर्यटनं कृतवन्तः परच यथैव ते सागर-तटस्य समीपम् आगताः, यज्ञ अश्वः सहसा विलुहः जातः।

कुत्र गतोऽयम् अश्वः ? नृपतेः सगरस्य पुत्राः वित्तुमम् अर्थ सर्वत्र अन्विष्यन्तः। अश्वस्य अन्वेषणार्थ पदा पृथिव्यां न किमपि स्थानम् अवशिष्टम्, तदा ते अन्ततः पाताल लोकं प्रयाताः। तत्र ते अर्थ दृश्वन्तः। अयम् अश्वः गूढ ध्यानस्थ महर्षि कपिलं निकषा बद्धः आसीत। वस्तुतस्तु, देवेन्द्रः अमुम् अश्नं चोरितवान। सगर-पुत्राः तथ्यमिदम् अजानन्तः महर्षि कपिलम् आक्रान्तु सत्रद्धाः जाताः। क्रोधेन आविष्टः महर्षिः स्वीय-नेत्रे उन्मील्प दृष्टि-मात्रेण तान् भस्मीसात् चकार।

नृपतिः सगरः विलुप्तान् राजकुमारान् अन्वेष्टुं स्वीयं पौत्रम् 'अन्शुमन्तं' प्रेषितवान्। अन्शुमान् यदा महर्षि दृष्टवान् सादरम् असी तं नमस्कृतवान् । अन्नुमतः विनप्रताम् अवलोक्य प्रसनः तपोमूर्तिः कपिलः अर्थ परावर्तितवान् अवादीत् च, यत्' सगर पुत्राणां मुक्तये त्वया भगवती गङ्गा धरातलम् आनेताष्या। परछ अन्शुमान् तस्य पुत्रः दिलोपः वा एतत् कार्य कर्तुं नैव अपारयताम् तत्रान्तरे, दिलीपस्य आत्मजः भगीरथः राजा अभवत। भगीरथः भगवतीं गङ्गां धरातलम् अवतारयितुं समैहत। सः स्वोय-राज्य-कार्य-भारं निज-मन्त्रिभ्यः दत्वा तपश्चर्याम् आचरितुं हिमालय प्रति अगच्छत। भगीरथस्य अनेक-वर्षीय कठोर तपश्चर्यायाः अनन्तरम् भगवती गङ्गा तस्य समर्थ प्रत्यक्षीभूता। भगीरथस्य ब्रद्धया समर्पणेन चतुष्ट भगवती गङ्गा अवोचत् भी भगीरथ । अहं धरातलम् आगन्तुमा अस्मि। परन्तु भगवान् शिवः एवं मम अवतरण वे धारशिक्ष्यति।

कृतनिश्चयः भगीरथः भगवन्तं शिवं प्रसादयितुं पुनः तपः आचरितवान। अनेकेषां वर्षाणाम् अन्तरालानन्तरं भगवान् शिवः प्रत्यक्षीभूतः । भगीरथस्य कामगां प्रपूरयन् भगवान् शिषः अवादीत् श्स्वर्गतः अवतरन्याः गङ्गायाः प्रवाह-वेगं धारयितुं शक्ष्यामि एवं प्रकारेण, भगवान् शिवः निज-जा-कलापे स्थातुं भगवती गर्दा साकृतवान्। तदनु भगवती गङ्गा कौतुकेन विचारितवती- 'मन्ये, भगवान् शिवः सुदीर्घ कालं यावत् मम प्रवाह-वेगं धारयितुं नैव शक्ष्यति। कथं नाहं भगवन्तं शिवम् आमा साकमेव पाताल- लोकं नयेयम् ? परन्तु सर्वज्ञः भगवान् शिव भगवतीं गङ्गां स्वीय जटा-कालापे आबद्धवान। अनेक वर्षाणि यावत् भगवती गङ्गा ततः निष्कान्तुं निरर्थकं प्रायतत। भगीरथः पुनः भगवन्तं शिवं प्रसादयितुं तपस्याम् अकरोत् भगवान् शिवः स्वोपं जटा-कलाप उन्मोचितवान्, ततः गङ्गा-प्रवाहं पृथ्वीम् अस्पृशत्।

पृथिव्यां अवतरितस्य गङ्गा-जालस्य सत-धाराः अभूवन् । तासु धारा-त्रयं प्रार्थी प्रति, अपरं धारा-त्रयं प्रतीचों प्रति प्रावहत्। सप्तमः प्रवाहः भगीरथम् अन्वगच्छत् अपि च अन्तिमत्वेन महात्मनः जसैः आश्रमं प्रापवान्। अहङ्कारपूर्णा भगवती गङ्गामोत्साहं स्वीय शक्ति-प्रदर्शनार्थ आवमं जलाप्रावितम् अकरोत। अनेन विक्षोभेण क्रुद्धः महात्मा जङ्कः गङ्गायाः अपना पीतवान् गङ्गां च शोषितयान् । भगीरथः महर्षेः पादारविन्दयोः निपात्य याचितवान् यत् 'कृपया गङ्गा-देवों क्षम्यताम्, हे महात्मन्। भवान् यदि एनां विमोक्ष्यसि चेट, मम पूर्वजाः मुकाः भवितारः।'

महात्मा जहुः भगीरथे करुणान्वितः सन् प्रवाहं निज कर्ण-कुहरात् बहिः निष्कासितवान्। ततः प्रभृति देवी गला नाहवी- इति नाभ्ना अपि प्रख्याता जातानाही अर्थात् ज मुनेः जाता मरित् वा कन्या।

ततः परम्, भगीरथः गङ्गां पाताल लोक अनयत्। यथैत देवी गङ्गा सगर पुजाणां भरवशेषस्थलीम् आप्लावितवती, ते सर्वे अपि मुकाः सञ्जाताः। एवं रीत्या भगीरथः यत् कार्य-लक्ष्यं निश्चितवान्, तत् पूर्णताम् अनयत्। ततः परम्, भगीरथः देवीं गङ्ग सागरं प्रति नीतवान्।

अनेक-वर्षाणि व्यतीतानि। एकदा नृपतिः शन्तनुः गङ्गा-नद्याः तीरे सुन्दरीं रमणीमेकाम् अपश्यत्। वस्तुतः एषा मानव-रूपधारिणी भगवती गङ्गा आसीत् ।

'भो परम-सौन्दर्य-शालिनि महाभागे, ममेदं सौभाग्यम् अभविष्यत, यदि भवती मम अर्धाङ्गिनी अभविष्यत्', शन्तनुः स्वीयां समीहां प्राकटयत् । भगवती गङ्गा प्रसन्ना सती उदतरत् । ससमयं भवता सह विवाहं करिष्यामि। कदाचिदपि भवान् मम कार्य-विषयिणीं पृच्छां नैव करिष्यति इति।

राजा शन्तनुः समयमेनं स्वीकृतवान, अपि च, अनयोः विवाहः महता समारम्भेण वैभवेन च सम्पन्नः। किञ्चित्-कालानन्तरम्, ताभ्याम् एकः पुत्रः अजायत। भगवती गङ्गा च किम् अकरो...? सा तं पुत्रं नद्याम् अक्षिपत् । राजा शन्तनुः स्तब्धः एवातिष्ठत् यतो हि तेन स्वीय-पच्या सह कृतः समयः परिपालनीयः आसीत्। पत्र्याः आश्चर्यकारिणः कार्यस्य विषये स न किमपि प्रष्टुम् अपारयत्।

एतावत्-पर्यन्तमेव पर्याप्तं नासीत्। सा अपरान् अपि नव-जातान् षट् पुत्रान् नद्याम् अक्षिपत्। राजा शन्तनुः स्वीय-दुःखं नियन्त्रितवान् परं निज-पत्नीं न किमपि प्रष्टुम् अपारयत्। परश, भगवती गङ्गा यथैव स्वीयम् अष्टमं पुत्रं नद्याम् प्रक्षेमुम् उद्यता, राजा शन्तनुः ताम् अवरोधितवान्, प्रार्थितवान् च 'कृपया आत्मजम् एनं जीवितुम् आज्ञापय।( तस्मिन् क्षणे एव भगवती गङ्गा स्वीय-पुत्रेण साकं तिरोहिता बभूवा

अनेक वर्षाणि व्यतीतानि। राजा शन्तनुः यदा मृगयार्थ गतः आसीत, सः अनुपममेकं दृश्यम् अपश्यत्। कश्चन परस्सहस्रं शरौघैः भित्तिं निर्माय गङ्गा-प्रवाहम् अवरोधितवान्। शन्तनुः किशित् अग्रे गत्वा अपश्यत् यत् तत्र एकः बालकः स्थितोस्ति। अयमेव बालकः परस्सहस्रं शरीचौः भित्तिं निर्मीय गङ्गा-प्रवाहम् एवम् अवरोधितवान्। शन्तनुः सन्निकटं गत्वा तं द्रष्टुम् ऐच्छत् परश्च सः तिरोहितः। तस्मिन्नेव क्षणे शन्तनुः अन्वभवत् यद् कदाचित् एषः मम पुत्रः सम्भवेत्?

'शन्तनुः सौत्सुक्यं देवीं गङ्गां प्रार्थितवान्। भगवती गङ्गा निज-पुत्रेण साकं स्वयमेव उपस्थिता अजायत न्यगादीच्च यत् 'अयमेव अस्मदीयः अष्टमः पुत्रः देवव्रतः अस्ति।' भगवती गङ्गा एतदपि न्यगादौत् यत। अष्टसु वसुषु अन्यतमः अयं द्यौः अस्ति यः अस्माकं पुत्र-रूपेण पुनर्जातोस्स्ति । कृपया एनं स्वीकरोतु।श भगवती गङ्गा शन्तनवे देवव्रतं दत्वा कैलासम् आरूढवती, महाविष्णोः वचनञ्ज सत्यापितवती।

(32) एषा अस्ति कथा यत् भारतस्य पवित्रा नदी गङ्गा केन प्रकारेण धरातलम् अवतीर्णा। गङ्गायाः पवित्रता-विषये महाभारत-ग्रन्थे लिखितमस्ति यत् 'दुष्कर्म निवृत्यर्थ गङ्गा जलावगाहनं परमावश्यकम्। गङ्गा-जलावगाहनं शत-यागानाम् अनुष्ठान-तुल्यं वर्तते । भारतवासिनां कृते गङ्गा केवलं नदी एवं नैवास्ति परमेषास्ति शदिव्य-मुक्तेः पवित्रतायाः च अनन्त प्रवाहः।




## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249**

# ॥ श्रीः॥

# संस्कृते भारतीयज्ञानपरम्परा



-डॉ. अरविन्दकुमारतिवारी
संस्कृतप्रवक्ता
आदर्शवैदिक विद्यालय इण्टर कॉलेज
नंगला-सिनौली, बागपत
दूरभाष 955741038
इमेल arvindt490@gmail.com

श्रूयते विद्वन्मुखारविन्देभ्यो ज्ञायते शास्त्रपरिशीलनेन च यज्ज्ञानसूर्योदयो भारतदेशे एव सर्वप्रथमम् अभूदिति। चत्वारो वेदा हि ज्ञानराशिभूताः अद्यापि भारतस्य महिमानं मण्डयन्तो दृश्यन्ते। वेदशब्दस्य व्युत्पतिविद्ध ातोः अचि घञि कृते निष्पद्यते यस्य बहुष्वर्थेषु ज्ञानमपि गृह्यते। आ ब्रह्मन्! ब्राह्मणो ब्रह्मवर्चसी जायातामित्यत्रापि[1] ज्ञानस्यैव प्राध ान्यमवलोक्यते। सत्यं ज्ञानमनन्तं ब्रह्म[2] इत्यपि उपनिषद्वचो ज्ञानमेव ब्रह्मेति विज्ञापयति। श्रीमद्भगवद्गीता तु सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसीति [3] उक्त्वा ज्ञानस्य माहात्म्यं बोधयति। ज्ञानमस्ति यस्य स ज्ञानीति निगद्यते। श्रीमद्भगवद्गीता प्रमाणयति यदीश्वरं चतुर्विधा जना भजन्ते। यथा

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन!
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ![4]

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते[5] इति वचनमपि श्रीमद्भगवद्गीताया अस्ति यदवगमयति जिज्ञासून् ज्ञानस्य महत्त्वमिति। ज्ञानिजन एव तत्त्वदर्शी मन्यते। ज्ञानिनस्तत्त्वदर्शिनः[5] इति श्रुतेः। सम्प्रति जिज्ञास्यते ज्ञानं नाम किम्? ज्ञानस्य स्वरूपं किमस्ति येन तत्त्वदर्शनं भवति? अस्या जिज्ञासायाः शमनार्थमेव वेदोपनिषत्परम्परानुगामिनो दर्शनग्रन्था ज्ञानस्य विषये पर्याप्तं स्वस्वमतं प्रकटीकुर्वन्ति। ज्ञानशब्दस्य व्युत्पत्तिरेवं मन्यते। ज्ञायते येन विषयस्तज्ज्ञानमिति। साङ्ख्यदर्शनं विवेकज्ञानमेव स्वीकरोति। येन पञ्चविंशतेस्तत्त्वानां विविच्य बोधो भवति। अतएवेदं साङ्ख्यं समुद्घोषयति यत्-

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्।।[6]
दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।।[7]

सांख्यदर्शनेन व्यक्ताव्यक्तज्ञविज्ञानमेव ज्ञानं मनुते यतः दुःखाभिभवो विधीयत इति। समुपसर्गपूर्वकाच्चक्षिङ् ख्याञ्धातोरणि कृते सांख्यशब्दो निष्पद्यते। यस्यार्थो भवति सम्यक् ख्यानम्। इदमेव प्रकृतिपुरुषविवेकनाम्नापि व्यह्रियते, विवेकबुद्धिः सत्त्वपुरुषान्यताख्यातिरपि कथ्यते। साङ्ख्ये दुःखत्रयनिवृत्तिरेव परमपुरुषार्थ उच्यते। तत्प्रति सत्त्वपुरुषान्यताज्ञानमेव कारणं मन्यते सांख्यदर्शनं वृत्तिरध्यवसायो ज्ञानं प्रमाणमिति शब्दाः पर्यायवाचिनः सन्ति संख्यावतां दृष्टौ। यथोक्तं सांख्यतत्त्वकौमुद्यां यत्

अध्यवसायश्च बुद्धिव्यापारो ज्ञानम्। उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्याम्, बुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसायः इति वृत्तिरिति ज्ञानमिति चाख्यायते। इदं तावत् प्रमाणम्।[8]

साङ्ख्यदर्शने तत्त्वाभ्यासात् विपर्ययसंशयरहितं यज्ज्ञानमुत्पद्यते तदेव अविशुद्धं ज्ञानं कथ्यते। यथा एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।

अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्।।[9]

आत्मा ज्ञः पुरुषः सर्वथा गुणरहितो यदा तत्त्वाभ्यासात् आत्मानं प्रकृतेः पृथक् मन्यते तदैव विवेकज्ञानोदयो मन्यते। साङ्ख्यदर्शनं योगदर्शनं च समानमेव ज्ञानपरम्परां स्वीकुरुतः। दृष्टमनुमानमाप्तवचनमिति प्रमाणत्रयं साङ्ख्यमङ्गीकरोति प्रत्यक्षानुमानागमाः प्रमाणमिति योगदर्शनमङ्गीकुरुते।[10] इति सर्वमपि सुविदितमेव विदुषाम्। तदेव क्वचित् यथार्थम् अयथार्थमिति द्विविधं मतम्। यथार्थन्तु संशयविपर्ययशून्यं भवति, अयथार्थन्तु संशयविपर्यययुक्तमेव मन्यते। पुनरपि ज्ञानस्य द्वैविध्यं श्रूयते सविकल्पनिर्विकल्पकनाम्नेति। सविकल्पकं ज्ञानन्तु नामजात्यादियोजनासहितं निर्विकल्पकन्तु बालमूकादिज्ञानं स्वीक्रियते। अनेन प्रकारेण दर्शनशास्त्रेषु भारतीया ज्ञानपरम्परा विलक्षणा दृश्यते। यथा साङ्ख्ये तत्त्वविज्ञानं तथैव न्यायदर्शने प्रतिपदं ज्ञानराशिरेव कियन्तः पदार्थाः, किमेतेषां लक्षणम्, स्वरूपमिति अद्भुतं ज्ञानं न्यायदर्शने निहितमस्ति। यथा गन्धवत्वं पृथिव्या लक्षणम्। कियन्ति द्रव्याणि, तेषां लक्षणं स्वरूपं किं किमिति सर्वमपि विचित्रमेव विज्ञानं न्यायवैशेषिकदर्शने निहितमस्ति। सर्वमपि दर्शनं ज्ञानमार्गेण गन्तव्यं परमपुरुषार्थं समीहते। चार्वाको वा स्यात्, जैनो वा भवेत्, बौद्धो वा भवेत्, सर्वत्र ज्ञानमीमांसा यथाशक्ति समुपलभ्यते। इमानि दर्शनशास्त्राणि मानवान् धर्ममार्गे नियोजयन्ति। यथा साङ्ख्यमुपदिशति-

धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः।।[11]

अर्थात् धर्मेण मानवो मुक्तिं विन्दति। धर्मशब्दस्य व्याख्याने आचार्यो वाचस्पतिमिश्रमहाशयाः लिखन्ति। यत्

धर्मोऽभ्युदयनिःश्रेयसहेतुः तत्र यागदानाद्यनुष्ठानजनितो धर्मोऽभ्युदयहेतुः, अष्टाङ्गयोगानुष्ठानजनितश्च निःश्रेयसहेतुः।। गुणपुरुषान्यताख्यातिर्ज्ञानम्।[12]

दार्शनिका जानन्ति यत् प्राणिलोकः स्वार्थपूर्तये अनर्थमाचरति। अतः धर्म एव करणीयः, धर्मं चर[13] इत्युपनिषद्वाक्यं स्मरणीम्। इदमेव लक्ष्यीकृत्य वैशेषिकैः अथातो धर्मजिज्ञासा[14] इति। योगदर्शनमपि मानवानां कल्याणायैव योगाङ्गानि वर्णयति। योगमार्गगमनेन मोक्षावाप्तिरिति। तत्रादौ यमनियमानां पालनमतीव सुखदायकं मतम्। एतद्विशिष्टं ज्ञानमेवास्ति। यत्र अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहाणां[15] ग्रहणं शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानां[16] नियमानां पालनं कियत् सुखं जनयतीति साधक एव सानन्दं वक्तुं शक्नोति। एत एव भावाः वेदे काव्ये उपनिषदि विलोक्यन्ते। पश्यन्तु भवन्तः।

मानवजीवने ज्ञानमेव सर्वमस्ति। यत्र यत्र सृष्टिर्वर्तते तत्र तत्र ज्ञानिनो जन्म लेभिरे। किन्तु भारते या ज्ञानपरम्परा आसीत् अस्ति च सा सनातनज्ञानपरम्परा मन्यते। इयं मानवमूल्यानि वर्द्धयति। इयं ज्ञानपरम्परा शिक्षयति यत्

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्
देवा भागं यथा पूर्वे संजानाना उपासते।।[16]

भारतीया ज्ञानपरम्परा त्यागं समुपदिशति। अतएव उपनिषद् वक्ति यत्

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुंजीथाः मा गृधः कस्यस्विद्धनम्।।[17]

भारतस्य ज्ञानपरम्परा चरित्रनिर्मात्री वर्तते अनादिकालादेव। चरित्रनिर्माणार्थं यादृशी ज्ञानपरम्परा भारते विलोक्यते न सा अन्यत्र क्वचिदस्तीति वक्तुं शक्नुमः। अतएवोक्तम्

वृत्तं यत्नेन संरक्षेद् वित्तमायाति याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।[18]
अस्मादेव कारणादुक्तं स्मृतौ यत्
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।[19]

अत्र कश्चिन्मुनिः कस्यचिद् व्याधस्य बाणेन भूमौ लुठन्तं क्रौंचं विलोक्य कारुण्यपारावरतरंगवद् समुच्छन् शपते यत्

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौंचमिथुनादेकमवधीः काममोहितम्।।[20]

अस्य भारतवर्षस्य ज्ञानपरम्परामेव दर्शयन् समुद्घोषयति परोकारं कर्तुम् अपकारं त्यक्तुं च। यथा

ऊर्ध्वबाहुर्विरौम्येष नहि कश्चिच्छृणोति माम्।
परोपकारः पुण्याय पापाय परपीडनम्।।[21]

महाभारतं भारतीयज्ञानपरम्परायाः कोषो मन्यते। अतएव तु केनचिदुक्तं यत् नमोस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायायतपत्रनेत्र।

येन त्वया भारततैलपूर्णः प्रज्ज्वालितो ज्ञानमयः प्रदीपः।।[22]

भारतीयं ज्ञानं आचारे व्यवहारे विलोक्यते यतोहि शास्त्रेषु निहितं ज्ञानम् आचार्यः शिष्येभ्यो ग्राहयति, स्वयमाचिनोति च तस्मादाचार्य उच्यते। अस्मादेव कारणाद् उपनिषदि आचार्यो वेदनूच्य वक्ति यत्

मातृदेवो भव पितृदेवो भव आचार्यदेवो भव अतिथिदेवो भव, यदि कर्मविचिकित्सा वृत्तविचिकित्सा वा भवेत् तत्र ये सम्मर्शिनो अलूक्षाः ब्राह्मणा ते यथा वर्तेरन् तथा वर्तितव्यम्।[23] अतएवोच्यते-

महाजनो येन गतः स पन्थाः।[24]
एवमेव विचिन्त्य व्यहारशिक्षकैरुक्तं यत्
रामादिवद् वर्तितव्यं न रावणादिवत्।[25]

इमामेव भारतीयज्ञानपरम्परां पालयन् महाकविः कालिदासः पंचमहाभूतानां संरक्षणाय अभिज्ञानशाकुन्तलं विलिख्य श्रृंगारव्याजेन अद्भुतं ज्ञानमार्गमदर्शयत्। असौ जानाति स्म यत् मानवाः कथं शिक्ष्येरन्। अतः मंगलाचरणे एव मंगलाचरणमेव परिशील्यताम्। यथा

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।[26]

अयं महाकविः प्रकृतिसंरक्षणायैव जनिमलभतेति कदाचित् प्रतीयते। पर्यावरणं प्रति अस्य भावनां कदाचित् महर्षिं वाल्मीकिमपि अतिशेते। असौ महामुनिरादिकविस्तु ज्ञानपरम्परां सुमित्राव्याजेन श्रीरामवनगमनकाले लक्ष्मणाय ददानो ब्रूते-

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्।
अयोध्यामटवीं विद्धि तात गच्छ यथासुखम्।।[27]

किन्तु महाकविः कालिदासस्तु प्रकृतिसंरक्षणस्य भारतीयज्ञानपरम्परां दर्शयन् सुस्पष्टं कण्वमुखेन ब्रवीति। यथा

पातुं न प्रथमं जलं व्यवसितं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।[28]

वनौकसोपि सन्तो लौकिकज्ञा वयमिति वाक्यं भारतीयज्ञानपरम्परामेव दर्शयति। अयं महाकविस्तु रघुवंशे ब्रूते।

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन।
यो हेमकुम्भस्तननिस्सृतानां स्कन्दस्य मातुः पयसां रसज्ञः।।[29]

एकया एव घटनया कविः भारतीयज्ञानपरम्परां रक्षन् अपूर्वं कार्यं कुरुते। गोरक्षाव्याजेन वृक्षरक्षापि दर्शिता महाकविना कालिदासेन। इयमस्ति सनातनज्ञानपरम्परा भारतीयानामिति।

अयि महानुभावा ज्ञानिनो भारतीयाः!

भारतीया ज्ञानपरम्परा कर्मवादाश्रिता वर्तते, भारतीया ज्ञानपरम्परा नैतिकमूल्यविभाविका विद्यते। भारतीया ज्ञानपरम्परा लोकसंग्रहशिक्षिका वर्तत इति भाषणे नास्ति सन्देहलेशोऽपि। वेदा वा स्युः, उपनिषदो वा स्युः, रामायण-महाभारत-पुराण-काव्यानि वा स्युः सर्वत्र भारतीया ज्ञानपरम्परा येन केन प्रकारेण निहिता दृश्यत एव। अस्माकं यज्ञे अरण्या अग्निप्रकटीकरणं भारतीयज्ञानपरम्पराया एव निदर्शनं कारयति। यज्ञेन धूमोद्भवस्तेन मेघोन्नतिस्ततो जलवृष्टिरपि भारतीयां ज्ञानपरम्परामेव दर्शयति। यस्मिन् काले भूमण्डले जनानां परिचय औषधविज्ञानस्य नासीत् तदानीं भारते आयुर्वेदो विश्रुत आसीदिति श्रूयते। नाडीस्पर्शमात्रेण वैद्याः रोगान् ज्ञातुं शक्नुवन्ति स्म। विद्युच्चमत्कृत्या झंझायाः वृष्टेर्वा अनुमानं कुर्वन्ति स्म। वंशिकया मधुरं वेणुनादं कारं कारं जनान् विमोहयन्ति स्मेति नातिचित्रम्। मन्त्रप्रभावेण आग्नेयास्त्रस्य प्राप्तिः प्रक्षेपो विच्छेदश्चेति सर्वं क्रियते स्म। इदमासीद् भारतीयज्ञानपरम्पराया वैशिष्ट्यम्। तपसा महता जनः अपरिमतं बलमवाप्नोति स्म। अनेका विद्याः अनेकाः कलाः संस्कृते निहिताः नीतिग्रन्थाश्च भारतीयां ज्ञानपरम्परामेव दर्शयन्ति। आकाशवदपरिमितं विषयमिमं स्पृशन् दिङ्मात्रेण यथेच्छं क्रममपहायैव वक्तव्यं प्रस्तौमि।

नेदमेव अपितु व्याकरणादिशास्त्रेषु यो नवाचारः कालान्तरे आरब्धः स तु विलक्षण एवाभाति। साम्प्रतं जनाः कोलाहलं कुर्वन्ति यत् अयं नवाचारः अयं नवाचार इति। किन्तु कुचुटुतुपु एते उदिताः, वर्णानाम् उच्चारणस्थानानि भारतीयां ज्ञानपरम्परामेव दृग्गोचरीं कारयन्ति। प्रत्याहारविज्ञानं किं भारतीयज्ञानपरम्परायाः निदर्शनं न कारयति। सम्पूर्णमपि व्याकरणं पाणिनिपतंजलिकात्यायनादिवैयाकरणानां विशालं बुद्धिमेव समुपस्थापयति। इयमेवास्ति भारतीया ज्ञानपरम्परा। केन प्रकारेण वर्णा उच्चारणीयाः इत्यपि विलक्षणमेवास्ति शिक्षाग्रन्थेषु। यथा

व्याघ्री यथा हरेत्पुत्रा द्रष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्।।[30]

सन्दर्भाः

1. वेद
2. उपनिषद्
3. श्रीमद्भगवद्गीता
4. श्रीमद्भगवद्गीता
5. श्रीमद्भगवद्गीता
6. सांख्यकारिका 1
7. सांख्यकारिका 2
8. सांख्यतत्त्वकौमुदी 5
9. सांख्यकारिका 68
10. योगसूत्रम् 1.7
11. सांख्यकारिका 44
12. सांख्यतत्त्वकौमुदी 23
13. तैत्तिरीयोपनिषदः शीक्षावल्ली
14. मीमांसासूत्रम् 1
15. योगसूत्रम् 2.30
16. ऋग्वेदः 10 81 2
17. ईशावास्योपनिषद् 3
18. मनुस्मृति
19. मनुस्मृति 2.22
20. वाल्मीकिरामायणम्
21. महाभारतं स्वर्गारोहणपर्व 5.62
22. ब्रह्मपुराणं 138/11
23. शीक्षावल्ली
24. महाभारतम्
25. काव्यप्रकाशः प्रथम उल्लासः
26. अभिज्ञानशाकुन्तले, मंगलाचरणम्
27. वाल्मीकिरामायणे
28. अभिज्ञानशाकुन्तले चतुर्थांके
29. रघुवंशे द्वितीयसर्गे श्लोकसंख्या 14
30. पाणिनीयशिक्षाग्रन्थे 25

## सन्तो विश्वहितैषिणः समभवन्मन्ये विरक्ता बुधाः!



गार्हस्थ्यं बहुरागपाशजटिलं दुःखाब्धितुल्यं मतं
भार्यापुत्रसुबन्धवः प्रतिपलं बध्नन्त्यहो वार्तया।
रागाद्रागसमुद्भवस्तदनु हा लोभागमस्तद्भयात्
सन्तो विश्वहितैषिणः समभवन्मन्ये विरक्ता बुधाः।। १

-डॉ. अरविन्दकुमारतिवारी

हित्वा नैजगृहं कुलं स्वपितरं स्वाम्बां पराम्बां मुदा
धृत्वा हृत्पटले चरन्ति वसुधां सन्यस्य लोकक्रियाम्।
त्यक्त्वा व्यष्टिमहो समष्टिमनिशं सम्पोषयन्तः स्वतः
सन्तो विश्वहितैषिणः समभवन्मन्ये विरक्ता बुधाः।। २

सन्तापं स्वयमेव पूतहृदयाः सोढ्वा जगद्धेतवे
पादत्राणमपि त्यजन्ति मुनयः पृथ्वीव्यथाहारकाः।
श्रीमन्निर्मलमानसाः मलमपाकर्तुं जनानां श्रिया
सन्तो विश्वहितैषिणः समभवन्मन्ये विरक्ता बुधाः।।३

कार्पण्यं गृहिणां श्रुतं बहुविधं सन्न्यासिनां सेवने
औदार्यं च सतां विलोकितमहो श्रीगेहिनां सेवने।
आदित्यातपमाततं स्वशिरसां हर्तुं सदोत्था द्रुमाः
सन्तो विश्वहितैषिणः समभवन्मन्ये विरक्ता बुधाः।। ४

राष्ट्रे नः प्रचरन्ति दिव्यकृतयो मेघोपमाः साधवो
ये वृष्टिं सुखदां विधाय विपदां कालं हरन्तो द्रुतम्।
गूढागूढधनान्नवस्त्रविभवैः रक्षन्त एवामावनीं
सन्तो विश्वहितैषिणः समभवन्मन्ये विरक्ता बुधाः।। ५

कन्था सद्गुरुरस्ति लोकभवनं रम्यं कुटीरं चलं
पन्था बन्धुसमो विरक्तिरतुला धर्माङ्गिनी केवला।
सत्सङ्गो जनकः श्रुतिश्च जननी लोकप्रिया नन्दनाः
सन्तो विश्वहितैषिणः समभवन्मन्ये विरक्ता बुधाः।। ६

विश्वं सर्वमिदं कुटुम्बसदृशं भेदो न कश्चिन्मतौ
धर्मो मानवता सदा सहजता सर्वक्रियापादने।
तत्त्वं ब्रह्म जगत् पृथक् विषयिणी माया नृहेया ततः
सन्तो विश्वहितैषिणः समभवन्मन्ये विरक्ता बुधाः।। ७

आचारे शुचिता विचारसरणौ दिव्या शुभा धीरता
सम्मानो वचने धराविहरणे धर्मक्रियायोजनम्।
निर्द्वन्द्वो मधुरः स्वरो विनयता येषामिमे धीधनाः
सन्तो विश्वहितैषिणः समभवन्मन्ये विरक्ता बुधाः।। ८

## श्रीजगन्नाथ-सप्तकम्



प्रणेता
डॉ.नन्दप्रदीप्तकुमारः
वैदिकगणः

प्रकाशकान्तचिन्मयं प्रसन्नदारुविग्रहं
प्रफुल्लफुल्लसुन्दरं पुरीप्रमोदमन्दिरम् ।
विषाणुसंघशोषिणं विशालवैद्यघोषिनं
सहास्यगोललोचनं महाप्रभुं भजाम्यहम् ।।१

परंपराविमण्डितं तटे वटे मठे रतं
महाप्रसादमज्जितं महानुभावसज्जितम् ।
सुवर्णकीर्णनिर्जितं समन्दमन्दहासितं
पहण्डिनृत्यपण्डितं जगद्गुरुं भजाम्यहम् ।।२

त्रितापपापनाशकं त्रिधातुदोषघातकं
सुपञ्चभूतशोधकं विषाणुवेगरोधकम्
नितान्तशान्तिदायकं महार्तिनाशकारकं
सदा जगत्सुरक्षकं महाप्रभुं भजाम्यहम् ।।३

रथे कदापि सत्वरं विचित्रवीर्य्यमीश्वरं
मुखारविन्दसिन्दूरं सगद्गदं सुधासरम् ।
महापुराणसत्करं महेश्वरीपुरःसरं
सघोषहर्षतत्परं सदाशिवं भजाम्यहम् ।।४

निवासनीलपर्वतं प्रफुल्लपीतसत्पटं
समस्तवैष्णवाश्रितं समुद्रकूलनिर्जितम् ।
नितान्तशान्तचिद्घनं घनाघनप्रभायुतं
नियन्तृरोगभौतिकं भिषग्वरं भजाम्यहम् ।।५

ग्रहेशदर्पहारिणं खगेशयानचारिणं
नृशंस-कंसमर्दनं समस्तगोपशासनम् ।
सरागराधिकाधवं कृपालुनीलमाधवं
नवीनयौवनोज्वलं भजे निचोलमुज्ज्वलम् ।।६

नियोगभोगभक्षणं वियोगवेगमर्षणं
सुपुष्पहारधारिणं चराचरस्य पारिणम् ।
समन्त्रतन्त्रनायकं प्रवीणवेणुवादकं
विषाणुमुक्तिदायकं भजे सुखप्रदायकम् ।।७

## श्रीकृष्णाष्टकम्

-आनन्द शास्त्री

देवकीनन्दनो वासुदेवोऽच्युतः
गोकुले पालितो लालितो गोकुले।
धन्यदेशोऽपि सो वोवतार इह
यत्र लीला कृता चाथ गीता कृता ।।
नन्दजस्यापि लोकत्रयं मुखे
वेक्ष्य माता यशोदाभवन्मूर्च्छिता ।
लीलया तेजसा गोपबालस्य हि
देवताश्च स्मयन्ते सिमे खे स्थिताः ।।
पूतना मारिता चौव वत्सासुरः
हे हरे वै बकाघासुरौ तारितौ।
दर्पिता कंसदर्पस्त्वया हे विधे
ह्लादिताश्चैव भक्ता मुकुन्द स्वभूः।।
द्रौपदी रक्षिता पाण्डवा रक्षिताः
चेन्द्रदेवाच्च गोपालकास्ते तथा।।
संस्कृतिः रक्षिता संस्कृतं वर्धितं
संस्कृतिं संस्कृतं रक्ष लोके पुनः।।
गोपिका गोपका ह्लादिता हे प्रजा
औवामदेवोऽप्यसौ चोत्सुको धूर्जटिः।
चागता सा यशोदा गृहाद्वै बहिः
लोकिता लोकते गोपबालं तथा।।
तेजसा चेतसा सुन्दरं नन्दजं
केशवं श्रीधरं देवकीनन्दनम्।
सत्यभामापतिं कंसविध्वंसिनं
गोपिकावल्लभं सर्वदाहं भजे ।।
कैटभारिं रटामीह सेवे खलु
नौमि जाने च मन्दे च वन्दे हरिम्।
शाठ्ये चिन्तये च शृणोम्यच्युतं
स्तौमि चेक्षे सचे सर्वदा सर्वदा ।।
चक्रिणं शङ्खिनं नौमि योगेश्वरं
शाश्वतं निर्विकारं सकारं सदा ।
मायया कल्पितं बालरूपं तथा
हे हरे हे हरे पातु मां सर्वदा ।।
इदं कृष्णाष्टकं पुण्यं यः पठेत्कृष्णसन्निधौ।
कृष्णलोकमवाप्नोति कृष्णेन सह मोदते ।।

## सोऽयं रामललाप्रभुः

-डॉ.प्रमोदकुमारशर्मा
सह-आचार्यः
संस्कृतमेवम्प्राच्य-विद्याध्ययनसंस्थानम्
जवाहरलालनेहरु-विश्वविद्यालयः, दिल्ली -६७



यो वाल्ये पितुराज्ञया गुरुगृहङ्गत्वापठद्वैदिकीं
विद्यां ताम्परमाद्भुताङ्गुरुमुखाद् वेदाङ्गतामागताम्।
सोऽयं रामलला स्वयं पुनरयोध्यायामहो पूर्ववत्
शस्त्रास्त्रायुधचापबाणसहितस्त्रेतायुगादागतः।।१।।

त्रेतायाम्भुवि राक्षसानहरहो हन्तुम्प्रभुश्श्रीहरिः
यो नीलाम्बुजकोमलाङ्गवपुषा भूमावतारं दधौ।
भक्तैस्सुन्दरनिर्मिते कलियुगे भव्ये नवे मन्दिरे
सोऽयं रामलला स्वयम्पुनरयोध्यायामहो राजते।।२।।

रामो वालमणिस्स्वयं स्वचरितैर्दिव्यैरहो शैशवे
कौशल्यान्निजमातरञ्च पितरं सानन्दमानन्दयत्।
यो वै श्यामतनुः प्रसन्नवदनो देवालये स्थापितः
सोऽयं रामललाप्रभुःप्रतिदिनम्भक्तैस्सदा स्तूयते।।४।।

विश्वामित्रमुनिप्रदत्तपरमामोघैर्हि दिव्यैश्शरैः-
र्यज्ञध्वंसकराक्षसाअपि हतास्समारिता ताडका।
कोदण्डेन वने प्रसन्नमनसा यज्ञास्सदा रक्षिताः।
येनासौ रघुनन्दनस्स्वयमयोध्यायाम्महो राजते।।३।।

यो ब्रह्माण्डमसृष्ट सर्वमखिलञ्चापीपलद्भूतलम्,
दुष्टेभ्यो जगदीश्वरो रघुवरस्साधूनृषीनात्मना।
रामो राजमणिस्स एव भगवानद्यापि सर्वात्मना
ध्यायं ध्यायमहो विभुस्स्वहृदये भक्तैस्सदा स्मर्यते।।५।।

## यात्रा

डा.प्रियव्रतमिश्रः

गन्तव्यं तत्स्थलमतिशयं दूरमेवास्तु जातु सङ्कल्पैवातति च हृदयं मङ्क्षु तत्राहो ! भूयः ।
निद्रालस्यं न खलु विरतिर्जायते कर्हिचिद्भोः! सेयं यात्रा वपति नितरां मानसे हर्षबीजम् ।।१।।

उत्कण्ठायां कलयति मुदा चित्रमेवात्र चित्रे तच्चेत्थं स्यात्तदपि च पुनर्यामि नूनञ्च तत्र ।
द्रक्ष्याम्येवं सुललितपदं चिन्तयत्यत्र शश्वत् सेयं यात्रा वपति नितरां मानसे हर्षबीजम् ।।२।।

सन्नद्धोऽसौ मुदितमनसा नैजद्रव्याणि तानि संरक्ष्यापि प्रमदतरसा दर्दृशीतीह भूयः ।
इत्थं त्वेवं भवतु च पुनर्मामकीनं प्रयाणं सेयं यात्रा वपति नितरां मानसे हर्षबीजम् ।।३।।

रात्रौ तस्यां न खलु शयनं नैव वा भोजनेच्छा वार्त्तायां वा न खलु रमते नैव चित्रे दिदृक्षा ।
यातुं मात्रं विलसति मनो नान्यतो वा समीक्षा सेयं यात्रा वपति नितरां मानसे तां निरीक्षाम् ।।४।।

सन्धार्यासौ रुचिरवसनं गन्धद्रव्यादिलेपं स्मृत्वा देवं सरति च गृहाद्यानसंस्थानदेशम् ।
कामान्सर्वान् मनसि कलयन् स प्रतिष्ठेत याने सेयं यात्रा वपति नितरां मानसे हर्षबीजम् ।।५।।

सम्मर्दे वोपविशति च पुनर्नैव क्लिश्नाति जातु मन्दं मन्दं हसति सततं वीक्ष्य पार्श्वस्थलोकम् ।
काङ्क्षत्येवं मम च वसतिर्जायतां वा गवाक्षे सेयं यात्रा वपति नितरां मानसे हर्षबीजम् ।।६।।

दर्शं दर्शं ललितप्रकृतिं पर्वताग्रप्रपातं शस्यैः पूर्णं हरितभरितं वप्रदेशं समन्तात् ।
स्रोतस्विन्याः कलकलरवं तूर्णमाकर्ण्य बन्धो! सेयं यात्रा वपति नितरां मानसे हर्षबीजम् ।।७।।

सम्पूर्तौ वै मनसि सुतरां कामना शिष्यते भोः! क्वेवं यात्रा पुनरपि भवेत्सोऽभिलाषश्च चित्ते ।
व्याप्ते काले क्वचिदिह सखे! ध्यानमाकर्षतीह सेयं यात्रा सुखदविभवं तन्तनीतीव लोके ।।८।।

सहाचार्यो व्याकरणविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी
डॉ9939622062 email.: shabda.priyavrat@gmail.com

## मित्र-पञ्चकम्



-डॉ.शशिकान्तशशिधरः

यन्मैत्रीं सुविचार्य नैजसमतायां केवलं साधयेद्
दृष्ट्वा दुःखभरं स्वमित्रमिह यद्दुःखान्वितं सम्भवेत्।
नैजं मित्रमहो सदात्मसदृशं प्रीत्यन्वितं मन्यते
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।01।।
कष्टं स्वीयबृहत्तमं भवतु चेज्जानातु साधारणं
सामान्यां विपदोपि यो गिरिसमां मित्रस्य सञ्चिन्तयेत्।
यन्मित्रं कुपथो निवार्य सुपथं शुभ्रं सदा प्रेरयेत्
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।02।।
साहाय्यं विदधात्वहर्निशमहो मित्रस्य यत्सर्वतः
शंकामुक्तविचारयुक्तमनसा मित्रेण सार्धं वसेत्।
नित्यं दुःखसुखे जयाजययोर्मित्रन्न यत्सन्त्यजेत्
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।03।।
यत्स्वप्नेपि च दम्भचौरनिकरम्मित्राय नो चिन्तयेत्
शुद्धान्तःकरणेन शुभ्रमनसा मित्रं स्वकं सम्मिलेत्।
स्वाम्मैत्रीञ्च सुदामकृष्णसदृशं चित्तेन यद्भालयेत्
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।04।।
विश्वासस्य सुकोमलं प्रियतमं सद्बन्धनं मित्रता
साक्षात्त्यागतपस्ययोर्भुवि शिवा दृष्टान्तता मित्रता।
दृष्टौ यस्य जगत्सुसारममृतं सम्वर्तते मित्रता
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।05।।

# श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी संस्कृतसप्ताहसमारोहः

श्रवणपूर्णिमातः भाद्रपदकृष्णनवमीं यावत् (19-08-24 तः 27-08-24 यावत्) श्रवणपूर्णिमातः भाद्रपदकृष्णनवमीं यावत् तदनु 19-08-24 तः 27-08-24 दिनाङ्क यावत् विश्वविद्यालयेन ऐषमः




संस्कृतसप्ताहः महताडम्बरेण उत्साहेन च परिपालितः । तत्र उद्घाटनसत्रे पुरीस्थस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरस्य निदेशकाः प्रो. वनमालीविश्वालमहोदयाः समागत्य संस्कृतभाषायाः साम्प्रतिकस्थितिविषये प्रबोध्य छात्रान् प्रेरितवन्तः । सारस्वतातिथित्वेन तस्यैव परिसरस्य निदेशकचराः प्रो. हरेकृष्णमहापात्रवर्याः आगत्य संस्कृतभाषाया आध्यत्मिकचेतनाविषये छात्रान् बोधितवन्तः । सप्तसु दिवसेषु भाषण- गानादिस्पधाः आयोजिताः । संस्कृतघोषयात्रा विद्वगोष्ठी, विद्यालयीयच्छात्राणां श्रीमद्भगवद्गीताकण्ठपाठस्पर्धा तत्र प्राधान्यमभजत । 27-08-24 दिनाङ्के सम्पूर्तिसत्रे उत्कलराज्यस्य संस्कृतशिक्षकसङ्घस्य अध्यक्षाः डा. कालीप्रसन्नशतपथीवर्याः मुख्यातिथित्वेन समागत्य संस्कृतभाषायाः वैशिष्ट्यमितरत्र प्रभावश्च कथं वर्त्तत इति प्रत्यपादयन् । समारोहेऽस्मिन् विश्वविद्यालयस्य सर्वेऽपि परिवारवृन्दाः अहमहमिकया भागमग्रहीषुः । समारोहस्य संयोजकः डा. प्रियव्रतमिश्रः सहसंयोजकश्च डा. राधाकान्तपण्डा आस्ताम् ।

प्रथमपुटस्य शेषभागः

## कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये...

सोसायटी फॉर बुद्धिस्ट स्टडीज-अध्यक्ष प्रो. सत्यप्रकाश शर्मा, प्रो. अरविंद जामखेड़करः, चांसलर, जेजे स्कूल ऑफ आर्ट्स, मुंबई, प्रो. बैद्यनाथ लाभः, मा. साँची बौद्ध एवं भारतीय अध्ययन विश्वविद्यालयस्य कुलपति प्रो. उदय चंद्र जैनः, ट्रस्टी, प्रो. प्रोफेसर रत्ना बसुः, एमेरिटस प्रोफेसर, कलकत्ता विश्वविद्यालयः, उपाध्यक्षः, इंडियन सोसाइटी फॉर बुद्धिस्ट स्टडीज। ललित कुमार गुप्ता, सचिवः प्रो.सरस्वती मुत्तसद्दी, कोषाध्यक्षः डॉ. सुरेश कुमारः, संयुक्त सचिवः प्रो. अम्बालिका सूद जैकबः विश्वविद्यालयस्य लेखाकारः प्रो. कृष्णकुमार पांडे एवं परिषदः स्थानीय सचिवः प्रो. प्रसाद गोखले विशेष रूपेण सहभागितां निरवहत्।



समापन कार्यक्रमस्य आरंभे गणमान्यातिथयः पुष्पांजलिं अर्पयित्वा देवी सरस्वती तथागत गौतम बुद्धश्च नमस्कृतौ। विद्यार्थिनः सरस्वती स्तुतिं बुद्ध प्रार्थनां च अकुर्वन् । परिचयं कुलसचिवः प्रो.कृष्णकुमार पांडे कारितवान्। सम्मेलनस्य कार्यवृत्तं सम्मेलन सचिवः प्रो.सरस्वती मुत्सद्दी द्वारा प्रस्तुतम्। अस्य सम्मेलनस्य आयोजनाय मुख्यातिथिः प्रोफेसर बैद्यनाथ लाभ मा. कुलपतये प्रो हरेराम त्रिपाठिने बधापिनानि धन्यवादं च दत्तवान् । विश्वविद्यालये आयोजितस्य सम्मेलनस्य माध्यमेन बौद्ध दर्शनस्य अध्ययनाय एकं बौद्धिक मंचं निर्मितम्। बौद्ध दर्शनस्य लक्ष्यं यत् बहुजन हिताय बहुजन सुखाय' अस्योद्देश्यं विश्वकल्याण एव। डॉ. पुरणचंद्र मेश्रामः कथितवान् संघभूमिः दीक्षाभूमिश्च भारते प्रसिद्धे कुलपतिः प्रोफेसर जी. राष्ट्रिय संस्कृत विश्वविद्यालय-तिरूपतेः जी एस आर कृष्णमूर्तिः स्वसंबोधने अकथयत् यद्बौद्ध दर्शनं संपूर्ण विश्वस्मै योजकं विद्यते। तदीयः शून्यवादः , माध्यमिककारिका प्रमाणवार्तिकम् इत्येतान् पाठयितुं नैव कश्चित् विद्यते। अतः पाली भाषायाः अध्ययनस्य बौद्ध दर्शनस्य प्रचारः आवश्यकः। मुख्यातिथिः डॉ. पंकज चांदे कथितवान्, विश्वविद्यालयस्य अवधारणा संसाराय बुद्धेन प्रदत्ता। मा कुलगुरू प्रो हरेराम त्रिपाठी स्वीये अध्यक्षीय भाषणे कथितवान् यद् एतत् सम्मेलनं बौद्ध विचाराणां प्रचार-प्रसाराय विद्यते धर्मे विकृतयः समायाताः ताः अपाकर्तु बुद्धः आचरणस्य अत्यंतं सरलं नियमम् अवबोध्य स्वयम् आचरणे आनीय दूरीकृतवान्। प्रो.त्रिपाठी सम्मेलनस्य आयोजनाय सर्वाभ्यः सहकारी समितिभ्यो धन्यवादं ज्ञापितवान्। सम्मेलने सर्वश्रेष्ठ शोध पत्राय शोधार्थी डॉ. अर्क प्रभा चटर्जी गणमान्यैः अतिथिभिः पुरस्कारः प्रदत्तः। कार्यक्रमस्य संचालनं आधुनिक भाषा विभागस्य प्रमुखः प्रो. पराग जोशी धन्यवादं परिषदः स्थानीय सचिवः प्रो. प्रसाद गोखले कृतवन्तौ राष्ट्रगानेन समापनं जातम् ।

# श्री सुधींद्र तीर्थ उत्तराखंड सांस्कृतिक वैभव प्रदर्शिनी समुद्घाटिता

हरिद्वारम्, 14 सितंबरः 2024 ख्रवेदव्यास मंदिर आश्रमे आयोज्यमानायाः त्रिदिवसीय-अखिल भारतीय संस्कृत संगोष्ठ्याः प्रथम दिवसे मुख्यातिथयः व्यास मंदिर आश्रम-अध्यक्षः के. श्री निवास प्रभुः, संस्कृत





भारत्याः अखिल भारतीय अध्यक्षः प्रो. गोपबंधु मिश्रः, प्रो कमला भारद्वाजः अखिलभारतीय-उपाध्यक्षः, दिनेश कामतः ,अखिल भारतीय संगठन मंत्री, संस्कृत भारती,जयप्रकाशगौतमः ,अखिल भारतीय सह संगठन मंत्री, संस्कृत भारती,श्रीमती जानकी त्रिपाठी प्रांताध्यक्षा संस्कृत भारती उत्तराञ्चलं, श्री लक्ष्मी निवास पांडेयः ,कुलपतिः कामेश्वर सिंह दरभंगा विश्वविद्यालयः,बिहारः, श्री सत्यनारायण भट्टः ,अखिल भारतीय महामंत्री संस्कृत भारती, प्रो. दिनेशचंद्र शास्त्री ,कुलपति उत्तराखंड संस्कृत विश्वविद्यालयः ,हरिद्वारं डॉ. आनंद भारद्वाजः , निदेशकः संस्कृत शिक्षा परिषद् ( उत्तराखंड) सम्मिलिताः आसन्।

अस्यां प्रदर्शन्याम् उत्तराखंडः यद् श्देवभूमिश्नाम्ना ज्ञायते , स्वीयं प्राकृतिकं, धार्मिकं सांस्कृतिकं महत्वं संपूर्ण विश्वस्मिन् विशिष्टस्थानं स्थापयन्ति। यत्र पवित्र नद्यः - गंगा, यमुना, अलकनंदा भागीरथी च-शताब्देभ्यो धार्मिक आस्था केंद्रं विद्यते। पञ्च प्रयागाः (विष्णु प्रयागः, नंद प्रयागः, कर्ण प्रयागः, रुद्र प्रयागः, देव प्रयागः) इत्येषाम् अत्यन्तं धार्मिकम्। अथ च पञ्च केदाराः -केदारनाथः, तुंगनाथः, रुद्रनाथः, मध्यमहेश्वरः, कल्पेश्वरश्च श्रद्धालुभ्यः शिव भक्तेः गहनायां नयन्ति। पञ्चबद्री -बद्रीनाथः, योगध्यान बद्री, भविष्य बद्री, आदि बद्री, वृद्ध बद्री चेति भगवन्तं विष्णुं प्रति आस्थाप्रतीकम् । अपि च मर्ककान्नं, गोधूमः, मंडपान्नम् इत्यादीनि विविधशस्यानि कृषि परंपरायाः आधारभूतानि। केदारनाथः, बद्रीनाथः जागेश्वर धाम इत्येभिः प्राचीन मंदिरैः सममेव अत्र सांस्कृतिक प्रदर्शन्यः एतां पवित्र भूमिम् अद्वितीयेति विनिर्मान्ति।

# अताबिराआदर्शविद्यालये विश्वसंस्कृतदिवसः

(वार्ताहरः वत्स देशराज शर्मा)

अताबिरा आदर्शविद्यालये गतशुक्रवासरे विश्वसंस्कृतदिवसः आचरितः। संस्कृतमयीसभायाः अध्यक्षता विद्यालयस्य अध्यक्षा श्रीमती गीता बुधिया कृतवती। मुख्यातिथिरूपेण विद्यालयस्य



प्राक्तनशिक्षकः मितीशकुमारबनिया महोदयः उपस्थितः आसीत्। सभायां सर्वे शिक्षकाः छात्राः च उपस्थिताः आसन्। सभायाः आरम्भे दीपप्रज्वलनेन देवता पूजिता । अनन्तरं छात्रा प्रियांशी दण्डसेना सभायाः संचालनं कृतवती। छात्राः संस्कृतभाषायाः प्रचारार्थं रुचिं प्रदर्शितवन्तः, मुख्यवक्तृशिक्षक आशीषकुमारसा, संस्कृतशिक्षकमहोदयः धर्मेन्द्रकुमारभोई च स्वभाषणेषु संस्कृतभाषायाः महत्त्वस्य विषये चर्चां कृतवन्तौ। अन्ते छात्रैः सांस्कृतिककार्यक्रमः कृतः। सांस्कृतिककार्यक्रमे भागं गृहीतानाम् छात्राणाम् अभिनन्दनं कृतम्। सभायाः अन्ते छात्रः रीतम साहुः सर्वेभ्यः धन्यवादान् दत्तवान्। अशोककुमारसाहूः, किशोरकुमारधरुआ, सीमाखडिया, सुधांजलिसाहू, मानससुना, करनमेहेरः च एतैः सहयोगैः सभा सफलता-पूर्वकं समाप्ता जाता।

# संस्कृतभारत्याः अखिलभारतीयगोष्ठी सम्पन्ना

हरिद्वारम् (धीरजमैठाणी)। संस्कृतं वैश्विकस्तरे समुन्नेतुं प्रतिपदं प्रयतत्या संस्कृतभारत्या विहितकार्याणां समीक्षायै आगामियोजनानां लक्ष्याणां च साफल्याय च समायोजितायाः अखिलभारतीयगोष्ठ्याः समारोहः जातः। समापनसत्रात्प्राक् उद्देश्यानि गुणवत्तां नवाचारांश्च समाधृत्य महत्वपूर्णे सत्रत्रये विभिन्नकार्याणि समाधातुं विभागैः, आयामैः प्रकल्पैश्च सम्बद्धविषयेषु विस्तृतचर्चा जाता। तत्र अधिकारिभिः सदस्यैश्च



गहनतया विचार-विमर्शः कृतः।

प्रथमे अखिल भारतीयाध्यक्षः प्रो गोपबंधु मिश्रः, महामंत्री सत्यनारायणभट्ट प्रचारप्रमुख श्रीश देव पुजारी च गतम् आगामिनं च वृत्तम् आधृत्य स्वीयविचारैः प्रांतप्रतिनिधीनाम् अभिमुखीकरणम् अकुर्वन्। अवसाने च अखिल भारतीय संगठन मंत्री दिनेश कामतः नूतनोर्जा सञ्चारयितुं, दायित्वं वर्धयितुं कार्येषु गुणवत्तां समाधातुं च नूतनपदाधिकारिणाम् अखिलभारतीयं प्रान्तीयं च दायित्वम् घोषितवान् यत् अखिलभारतीयस्तरे दिनेशकामतः उपाध्यक्षः, जयप्रकाशगौतमः सङ्घटन मंत्री , श्रीमान् दत्तात्रेयः सहसङ्घटनमंत्री ,श्रीरामः प्रशिक्षणप्रमुखः, शिरीषदेवपुजारी गीताशिक्षणप्रमुखः, सचिनकठाले प्रचारप्रमुखः, प्रो० लक्ष्मी निवास पाण्डेयः विद्वत्परिषद्प्रमुखः इत्यादिभिः सममेव प्रांतीय स्तरे डा० हरीश चंद्र गुरुरानी पश्चिमोत्तरस्य प्रांतमंत्री, प्रो.दिनेशचन्द्र शास्त्री उत्तराञ्चलप्रान्तस्य अध्यक्षः, डॉ० वेदव्रत प्रांतसहमंत्री जानकीत्रिपाठी प्रांतसमितिसदस्या च।

द्वितीयसत्रे विभागैः, आयामैः प्रकल्पैश्च संबद्धा विचारगोष्ठ्यः अजायन्त। तत्र कार्यविस्तारं नूतनानां सहभागितां समाधृत्य जनबलं वर्धयितुं दायित्ववतां पदाधिकारिणां चर्चासत्रं गणशः समायोजितम्। तत्र विहितकार्याणां वृत्तं, सम्भावितकार्यविस्तरणं, जनसहभागितावर्धनं च सविशेषं समुपस्थितैः ज्यैष्ठानां मार्गदर्शने दायित्ववद्भिः चर्चितं परामृष्टं विचारितम् च। अमुष्मिन्नवसरे प्रान्तप्रतिनिधयः, न्यासिनः, प्रान्तविभागस्तरीयाधिकारिणः, विविधव्यवस्थाप्रमुखाः, सहयोगिसंस्थानां व्यक्तिसंसाधकाः, पूर्वपदाधिकारिणः, सहयोगिनः, विभिन्नसंस्थाभ्यो, विद्यालयेभ्यो, महाविद्यालयेभ्यो, विश्वविद्यालयेभ्यश्च कुलपतयः, प्रवक्तारो प्राध्यापकाः , शिक्षकाः , शिक्षार्थिनः, कार्यकर्तारः, संस्कृतानुरागिणः सामाजिकाः भ्रातरो भगिन्यश्च समुपस्थिताः आसन्।

# उत्तराखण्डविद्वत्सभा द्वारा पञ्चदशः स्थापनादिवसः संस्थापकसम्मानसमारोहश्च

क्लेमेंट टाउन। सम्पूज्य संरक्षकाणां सानिध्ये सभा के संस्थापकेभ्यः स्व. श्री केशवानंद थपलियालः, स्व. श्री भगवती प्रसाद अमोली, स्व. श्री मंगलानंद भट्टः, स्व.श्री संपूर्णानन्द चंदोला अथ च भूतपूर्व अध्यक्षेभ्यः सम्मानं विधातुं सभा वार्षिकोत्सवं कम्युनिटि होल , छावनी परिषदि टर्नर मार्गे, क्लेमेंट टाउन क्षेत्रे धर्मपुर विधायकस्य विनोद चमोलीवर्यस्य मुख्यातिथित्वे सम्पादितवती। तेन सभा द्वारा अनुष्ठित धार्मिक




सांस्कृतिक कार्यक्रमाणां प्रशंसा कुर्वता अपेक्षित सहयोगाय प्रतिबद्धता प्रकटिता। कार्यक्रमाध्यक्षः आचार्य श्री विजेन्द्र प्रसाद ममगांई समागतान् अभिनन्द्य गरिमामय्यै उपस्थितये धन्यवादं ज्ञापितवान्। विशेषतया धनराशिना सहयोग सरितायाम् अमूल्य योगदानं दातृभ्यः समस्तोदारचरित आचार्येभ्यः आभारं व्यक्तीकृतवान् । सर्वप्रथमं समस्त पदाधिकारिणः उपस्थित विद्वज्जनाः च पञ्चाङ्ग पूजनम् अकुर्वन्। परशुराम चतुर्वेद विद्यालयस्य बटुक ब्रह्मचारिणः ईशावास्योपषदः सस्वरं पारायणं कृतवन्तः संस्थापक प्रतिनिधिषु अजय थपलियालः, दीपक अमोली, उदय शंकर भट्टः, अजय चंदोला पूर्वाध्यक्षेषु च उत्कृष्ट नेतृत्वाय उदय शंकर भट्टः, अनुसूया प्रसाद देवली, डॉ संदीप रतूड़ी, जय प्रकाश गोदियालः, वैदिकः आचार्य मंत्रीप्रसाद थपलियालः इत्येभ्यः प्रशस्तिपत्रेण, अंगवस्त्रेन , वेद मंत्रोच्चारणाय ब्रह्मचारिभ्यः उत्साह वर्धकपारितोषकेण सांस्कृतिक कलाकारेभ्यः अंगवस्त्रद्वारा च सम्मानं विहितम्। विशिष्टोद्बोधने उदय शंकर भट्टः, पवन शर्मा, डॉ रतूड़ी सभायाः एतावद् विहित इतिवृत्ते प्रकाशं क्षिप्तवन्तः। सांस्कृतिक सचिवः सुभाष चमोली संरक्षकं डा रामभूषण बिजल्वाणं, पौरोहित समाजस्य अध्यक्षं प्रेम बिंजोला, महासचिवं हर्षपति घिण्डियालम्, अखिल ब्राह्मण महासभायाः पदाधिकारिणो , नेपाली ब्राह्मण सभां, स्थानीय ब्रह्म समाजम्, आचार्य चंद्रप्रकाश जोशिनं, नृसिंह धाम्नः शशीकांत दुबे, कीर्तन मंडलीं च इत्येतान् समागतान् अतिथीन् अभिनन्दितवान्। हंसा ग्रुप संस्कृति विभाग उत्तराखंडस्य कलाकाराः गणेश वंदनां सामूहिक नृत्यं दीपांशी, श्वेता, निहारिका, संतोष भट्ट, अजय सजवाण एवं नील शाह च, गायकेषु प्रदीप असवाल, मुकेश घंसेला, विपिन, इंदु भट्ट ममगाई तथा च मंजु सुन्दरियालः, वाद्ययंत्रद्वारा अनिल नौडियाल, मोहित पंत, सुमित कुंवर इत्येते कलाकाराः गढ़वाली कुमाऊनी लोक गीतानां मनमोहक प्रस्तुतीनां मंचनम्अकुर्वन्। समागतानाम् आतिथ्यम् उपाध्यक्ष सत्यप्रसादसेमवालः अकरोत्। मच सञ्चालनं स्थानीय संयोजनं कार्यक्रमस्य सर्वविध व्यवस्थां च महासचिवः दिनेश प्रसाद भट्टः , अपेक्षित सहयोगं मुरलीधर सेमवालः, कोषस्य वृत्तोल्लेखेन सहितं सर्वेभ्यो धनराशि प्रदातृभ्यः कार्तज्ञ ज्ञापनं कोषाध्यक्षः अजय डबरालः, प्रस्तावित कथनं परामर्शकः राजेश अमोली, स्वागत भाषणं, समायोजनं प्रवक्ता मुकेश पंतः पर्यवेक्षणं लेखा निरीक्षकः उमेश प्रकाश भट्टः च अकुर्वन्। अवसरेऽस्मिन् पूर्व सचिवः चंद्रप्रकाश ममगाई, हर्षपति गोदियालः, वाचस्पति डिमरी, रमेश भट्टः, जयदेव सुंदरियालः, कालिका भवन प्रबंधकः, रोशन डबरालः इत्यादिभिः पूर्व पदाधिकारिभिः सममेव स्थानीय ब्राह्मणाः, आजीवन सदस्याः, लोकमान्य विद्वज्जनाः इत्येभिः सहिताः वर्तमान कार्यकारिण्यां भुवनेश थपलियालः, दीपक अमोली, परशुराम उनियालः, धीरज मैठाणी, स्थानीय सभानुरागिणो ब्राह्मणाः, मातरो भगिन्यश्च समुपस्थिताः आसन्।

# 'संस्कृत-पत्रकारिता' विषय पर द्विदिवसीय-राष्ट्रीय-संगोष्ठी

**दिनांकः-5-6 अक्टूबर 2024, दिन-शनिवार-रविवार**

**स्थान-राजधानी कॉलेज, (दिल्ली विश्वविद्यालय) राजागार्डन, नई दिल्ली-110015**

**केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली** के सहयोग से **संस्कृत-संवाद** (पाक्षिक संस्कृत समाचारपत्र), नई दिल्ली एवं **संस्कृत विभाग, राजधानी कॉलेज** (दिल्ली विश्वविद्यालय) के संयुक्त तत्त्वावधान में एक द्विदिवसीय संगोष्ठी का आयोजन किया जा रहा है। इस संगोष्ठी में संस्कृत जगत् के ख्यातिप्राप्त विद्वान्, विषय विशेषज्ञ, संस्कृत-पत्रकार, सम्पादक, प्रकाशक, शोधच्छात्र, संस्कृत विद्यार्थियों तथा समाज के संस्कृत अनुरागी प्रबुद्ध व्यक्तियों को आमंत्रित किया गया है। उपर्युक्त संगोष्ठी में इच्छुक शोधार्थियों द्वारा 'संस्कृत-पत्रकारिता' तथा इससे संबंधित निम्नलिखित विषयों पर शोध-पत्र आमंत्रित हैं।

1. संस्कृत पत्रकारिता-अतीत, वर्तमान और भविष्य।
2. संस्कृत के प्रचार प्रसार में संस्कृत पत्र-पत्रिकाओं की भूमिका/योगदान।
3. संस्कृत पत्र-पत्रिकाओं की कठिनाइयाँ व आर्थिक पक्ष।
4. संस्कृत पत्रकारिता की भाषाविषयक चुनौतियां।
5. संस्कृत पत्र-पत्रिकाओं द्वारा सामाजिक, नैतिक मूल्य संवर्धन एवं अपेक्षाएँ।
6. संस्कृत साहित्य में संस्कृत पत्र-पत्रिकाओं का योगदान व प्रकाशित कालजयी रचनाएं।
7. संस्कृत पत्रकारिता में प्रशिक्षण।
8. संस्कृत पत्रकारिता में आजीविका।

**शोध-पत्र भेजने की अन्तिम तिथि 3 अक्टूबर 2024 तक है।**

स्वीकृत शोध-पत्रों के लिए संगोष्ठी में प्रमाण पत्र दिये जायेंगे तथा उनका प्रकाशन कालान्तर में ISSN प्राप्त 'संस्कृत-संवाद' पाक्षिक समाचारपत्र में किया जायेगा।

शोधपत्र भेजने एवं संगोष्ठी में सहभागिता के लिए 'ऑनलाइन' रजिस्ट्रेशन अनिवार्य है।

विशेषः-

1. टाइप किये हुए शोधपत्रों को इस ई. मेल पर भेजें-sanskritsamvad@gmail.com
2. शोधपत्र पूर्व प्रकाशित न हों, मौलिक हों तथा संस्कृत/हिन्दी भाषा में हों।
3. शोध छात्रों के लिए पंजीकरण शुल्क राशि-200/रु है। अन्य के लिये रु 500/- है।
4. संगोष्ठी में सहभागिता हेतु आने-जाने का व्यय स्वयं शोधार्थी को करना होगा।
5. शोधार्थी अपना चित्र व संक्षिप्त परिचय भी भेजें।
6. पञ्जीकरण शुल्क ऑनलाइन, **संस्कृत संवाद**, खाता संख्या **22490200000142**, IFSC Code:- **IOBA0002249**, इण्डियन ओवरसीज बैंक, यमुना विहार दिल्ली-110053 पर भेजी जा सकती है अथवा संगोष्ठी स्थल पर नकद जमा

संयोजक

**डॉ.रवीन्द्रकुमारदास**
विभागाध्यक्ष, संस्कृत विभाग
राजधानी कॉलेज (दिल्ली विश्वविद्यालय)
Mob-: 9810939131

**वेदप्रकाश शर्मा**
प्रबन्धसम्पादक
संस्कृत संवाद, दिल्ली
Mob-: 09311086751, 9990774061

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।